A

DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

TANJORE MAHĀRĀJA SERFOJI'S

SARASVATI MAHĀL LIBRARY

TANJORE.

7662

VOL. XX - MANTRA ŚĀSTRA

COMPILED BY

K. S. SUBRAHMANYA SASTRY,

PANDIT, SARASVATI MAHAL LIBRARY,

TANJORE.

PUBLISHED BY

S. GOPALAN, B. A., B. L.,

HONORARY SECRETARY, FOR THE ADMINISTRATIVE COMMITTEE

T. M. S. S. M. LIBRARY,

TANJORE.

1952

[Price Rs. 12/-

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

S. K. Ramanatha Sastri
8-9-1954

GIFTED BY

K. V. Sarma

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

TANJORE MAHĀRĀJA SERFOJI'S

SARASVATĪ MAHĀL LIBRARY

TANJORE.

VOL. XX - MANTRA ŚĀSTRA

COMPILED BY

K. S. SUBRAHMANYA SASTRY,

PANDIT, SARASVATI MAHAL LIBRARY,

TANJORE.

PUBLISHED BY

S. GOPALAN, B. A., B. L.,

HONORARY SECRETARY, FOR THE ADMINISTRATIVE COMMITTEE

T. M. S. S. M. LIBRARY,

TANJORE.

1952

[Price Rs. 12/-

PRINTED AT THE
SRI VANI VILAS PRESS
—— SRIRANGAM ——

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

श्रीः ।

श्रीमत्तञ्जपुरीविराजमानराजकीय

सरस्वतीमहालयस्थ

॥ मन्त्रशास्त्रमातृकाग्रन्थानां

विवरणात्मिका सूचिका ॥

(विंशतितमसम्पुटात्मिका)

क्षे. शं. सुब्रह्मण्यशास्त्रिणा

सम्पादिता ।

श्रीमत्तञ्जपुरीमहाराजशरभोजीसरस्वतीमहालयकार्यनिर्वाहकसमित्यै

तत्कार्यदर्शिभिः

श्री यस्. गोपालन् बि. ए., बि. एल्. महाशयैः

प्रकाशिता ॥

1952

मूल्यम्] [१२ रूप्यकाणि

SREE SAI N. EDUCATIO SOCIETY
RESEARCH CENTRE

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

PREFACE.

This, the 20th volume of the Descriptive Catalogue of Sanskrit manuscripts in the Saraswatī Mahāl Library, gives a complete list with description of all the Mantra Manuscripts in the Library. This collection contains 547 Palm leaf manuscripts and 773 Paper manuscripts.

The Palm leaf manuscripts are very old and many of them are in a damaged condition. Their identification and description, therefore, remained unfinished. But they contain valuable materials. Pandits who are deeply versed in Mantra Sastra and have the knowledge of traditional practice are very rare, and it is a piece of good fortune that our Library found in its staff a fully qualified pandit, Sri K. S. Subramania Sastri and entrusted him with the work.

The Paper manuscripts contain not only the collection locally made by the Rājas of Tanjore but also the All-India collection made by Rājah Serfoji II (1798—1832) the scholar-king who has made substantial additions to this library and whose name has rightly been given to it. Even among the Paper manuscripts, there are some that have lost some of their front and back leaves and require an intimate acquaintance with the subject for their identification.

The learned compiler has to be congratulated on his having identified almost all the manuscripts and our thanks are due to him for his valuable services.

We are grateful to the Government of Madras for their liberal grants that have enabled us to undertake the publication of this Catalogue and many rare and useful Manuscripts of this Library.

Saraswatī Mahāl,
Tanjore,
4 –9 –'52.

S. GOPALAN,
Honorary Secretary.

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE
श्रीगणेशाय नमः ॥

॥ आवेदनम् ॥



अत्र हि श्रीमद्भारतदेशललामभूते श्रीमत्तञ्जपुरीविराजमानेऽस्मिन् महति श्रीसरस्वतीमहालये विद्यमानानां चोळाधीश्वरैस्सम्पाद्य संरक्षितानां सर्वेषामपि ग्रन्थानां, डाक्टेर् श्रीबरनेल् महाशयैस्सम्पाद्य मुद्रिता सूचिकैव प्रमाणं भवति । अतस्ते ग्रन्थाः B. No. इति कृतसाङ्केतिकसंज्ञाः प्रकाशन्ते । ततोऽर्वाचीनेषु कालेषु अस्य श्रीसरस्वतीमहालयस्यार्थे बहुभिर्महाशयैस्सामोदं समर्पिता ग्रन्थाः परश्शतं भवन्ति । अतस्तेषां ग्रन्थानामपि दातृनामानुरोधेन सूचिकासु संज्ञाश्च दत्ता भवन्ति । ये चैताभ्यः सूचिकाभ्यः परिभ्रष्टा ग्रन्थाः तेषां सर्वेषामप्यविशेषेण श्री O. S. रामस्वामिशास्त्रिभिर्महाशयैः (Ex-Librarian) सूचिका संपादिता । अतस्ते ग्रन्थाः O. S. R. No. इति संज्ञया व्यवह्रियन्ते । सर्वाभ्योऽपि सूचिकाभ्यो ये परिभ्रष्टा ग्रन्थास्तेषां No. less. इति, संख्याविहीनानां ग्रन्थानां no Nil इति च संज्ञा दत्तेत्यवधेयम् । ताश्च संज्ञा यथाक्रममत्रोपपाद्यन्ते ॥ यथा—

(1) श्रीडाक्टेर् बर्नेल्महाशयानां B. No.

(2) श्रीजम्बुनाथभट्लाण्डगे महाशयानां J. L. No.

(3) श्रीत्यागराजस्वामिमहाशयानां T. S. No.

(4) श्रीपतञ्जावधूतेन्द्राणां P. A. No.

(5) श्रीगोपालकृष्णढवळेकर् महाशयानां G. K. D. No.

(6) श्रीकृष्णाजी मेता महाशयानां K. M. No.

(7) श्री O. S. रामस्वामिशास्त्रिमहाशयानां O. S. R. No.

(8) एतासु सूचिकासु अनन्तर्गतानां No. less. No

(9) संख्याविहीनानां ग्रन्थानां No Nil.

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

Abbreviations used in this Catalogue.

Dr. Burnell's catalogue is the most important list of the Sanskrit Manuscripts collected by the Naik Kings and Maharashtra Kings in this Library. The numbers of the Manuscripts in Burnell's list are referred to as B. No. There have been subsequent additions to the Library Manuscripts donated by learned families in Tanjore and elsewhere. These are listed under the Donor's names and called after them (e. g.) J. L. No. for the manuscripts donated by JAMBUNATH BHAT LANDAGE. A number of manuscripts that have been left out by Dr. Burnell have been subsequently listed by Mr. O. S. RAMASWAMI SASTRI, a former Librarain of this Library. These manuscripts are referred as O. S. R. No. There are some paper manuscripts that have escaped these lists but have been included in the list kept in each bundle. They have been called 'number-less' manuscripts in these lists and the nomenclature is retained. Lastly there are manuscripts that have no numbers given to them and they are called 'No. Nil' manuscripts. But these last are very few.

The abbreviations are explained hereunder :—

1. Dr. Burnell's catalogue list. B. No.

2. Sri Jambunath Bhat Landage's collection. J. L. No.
3. Sri Thyagarajaswami's collections. T. S. No.
4. Sri Patanga Avadhoot's collection. P. A. No.
5. Sri Gopalakrishna Dhavalekar's collection. G. K. D. No.
6. Sri Krishnajee Mehtab collection. K. M. No.
7. Sri O. S. Ramaswami Sastri's list. O. S. R. No.
8. Manuscripts left out in the list but listed in the bundle. No. Less.
9. Manuscripts that have not been given any number anywhere. No. Nil.

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

முக்கிய அறிவிப்பு.

தஞ்சை ஸ்ரீ ஸரஸ்வதிமஹால் நூல்நிலயத்தில், நாயக்க, மஹாராஷ்டிர மன்னர்கள் சேமித்துக் காப்பாற்றி வைத்திருக்கும் கையெழுத்து நூல்களுக்கு, டாக்டர் ஸ்ரீ பர்னெல் பதிப்பித்துள்ள காடலாகுதான் முக்கியமானது. ஆகவே அந்நூல்களின் எண்கள் B. No. எனப்படுகின்றன. ஸமீபகாலங்களில் பலர் இந்நூல்நிலயத்திற்கு ஸராளமாக நூல்களை வழங்கியிருக்கிறார்கள். அவைகளுக்கு, கொடுத்தவர்களின் பெயரே வைக்கப்பட்டிருக்கின்றன. பழைய நூல்களிலும், புதிதாகக்கிடைத்த நூல்களிலும் பலநூல்கள் கணக்கிடப்படாமலிருந்தன. அவைகளுக்கு மாஜி லிப்ரேரியன் ஸ்ரீ O. S. ராமஸ்வாமி சாஸ்திரிகள் காடலாகு செய்திருக்கிறார். ஆகவே அந்நூல்களுக்கு அவர் பெயரே வழங்கப்பட்டிருக்கிறது. இந்த காடலாகுகளில் விடுபட்டுப் பின் எண்கள் கொடுக்கப்பட்டுள்ள நூல்களுக்கு No. less. என்று பெயர் வழக்கத்திலிருந்து வருகிறது. இத்தகைய No. less Mss. பல மூட்டைகளிலிருப்பினும் அந்தஅந்த மூட்டைகளிலுள்ள நூல்களுக்கு தனித்தனி எண்களே கொடுக்கப்பட்டிருக்கின்றன. கீழ்க்கூறிய காட்லாகுகளில் முற்றிலும் விடப்பட்டு எண்களும் குறிக்கப்படாத சிற்சில நூல்கள் சில மூட்டைகளில் இருக்கின்றன. அவைகளுக்கு No. Nil என்ற பெயர் வழக்கத்திலிருந்து வருகிறது. அவைகளின் விவரங்கள் கீழே குறிப்பிடப்பட்டிருக்கின்றன :—

(1) டாக்டர் ஸ்ரீ பர்னெல் காடலாகு கை. B. No.

(2) ஸ்ரீ ஜம்புநாத பட் லாண்டகே காடலாகு கை. J. L. No.

(3)	ஸ்ரீ தியாகராஜஸ்வாமி காடலாகு கெ.	T. S. No.
(4)	ஸ்ரீ பகங்காவனாத ஸ்வாமி காடலாகு கெ.	P. A. No.
(5)	ஸ்ரீ கோபால கிருஷ்ண டவளேகர் காடலாகு கெ.	G. K. D. No.
(6)	ஸ்ரீ கிருஷ்ணஜி மேத்தா காடலாகு கெ.	K. M. No.
(7)	ஸ்ரீ O. S. ராமஸ்வாமி சாஸ்திரிகள் காடலாகு கெ.	O. S. R. No.
(8)	காடலாகுகளில் விடுபட்டு பின் எண்க விடப்பட்டவைகளின் கெ.	No. less No.
(9)	மூற்றிலும் விடுபட்டு எண்களும் இல்லாதவைகள்.	No. Nil.

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

॥ श्रीगणेशाय नमः ॥

भूमिका ॥

(मन्त्रशास्त्रहृदयावेदनम्)



इह खलु जगति, मायोपनिबन्धनेऽस्मिन्संसारे तुषाङ्गारेष्विव परितप्यमानान् जनाननुजिघृक्षुर्भगवान् परमेश्वरः मन्त्रकलापान् प्रकाशयामास । ते हि मन्त्राः श्रुतिस्मृतीतिहासपुराणागमतन्त्रादिषु परश्शतमुपलभ्यन्ते । गते च काले श्रुत्यादीनां तेषां प्रायशस्सञ्जाते दौर्लभ्ये लोकानुग्रहैकपरायणाः श्रीमद्भगवत्पादादयो महान्तः तेभ्यो मुख्यतमान् मन्त्रान् संगृह्य प्रपञ्चसारादिग्रन्थरूपेण प्रकाशयामासुरिति नेदमविदितमावेद्यते विपश्चिमानाम् । तेषां सर्वेषां ग्रन्थानामलाभेऽपि तञ्जपुरीललामभूते ; अथवा भारतदेशललामभूते चोऽदेशाधीश्वरैर्महाराजैः स्वस्वकाले महता प्रयासेन संपाद्य संरक्षिते श्रीसरस्वतीमहालयाख्येऽस्मिन् महति भाण्डागारे प्रायेण सर्वेऽपि ते मन्त्रकलापा उपलभ्यन्त एवेति परमिदं प्रमोदस्थानं विपश्चिदपश्चिमानाम् । अतस्ते मन्त्रा यथामत्यत्र विमृश्यन्ते ॥

मन्त्रा ह्यनन्ता भवन्तीत्यतो मन्त्रप्रतिपाद्यमाना देवता अप्यनन्ता एव । ताः किल देवताः मतदेवताः आत्मदेवताः इष्टदेवताः कुलदेवताः गृहदेवताः ग्रामदेवताः लोकदेवताश्चेति विभज्य अभिधीयन्ते । अतो देवताभेदेन मन्त्रा अपि सप्तविधा भवन्ति ॥

गणेशसूर्यशक्तिशिवविष्ण्वाख्यानां पञ्चब्रह्मणां अन्यतमं दैवतं निर्गुणं ब्रह्मेति, अन्यानि दैवतानि तत्कार्यं ब्रह्मेति च भावयन्त उपासनपराः क्रमेण गाणेशास्सौराश्शाक्ताश्शैवा वैष्णवा इति; पञ्चस्वेतेषु दैवतेषु समबुद्धयस्स्मार्ता इति च व्यवहियन्ते। अतः, अद्वैतबोधकान्येतान्येव षण्मतानि गणकमुद्गलव्यासशङ्कराख्यैर्युगाचार्यैः स्थापितानीति योगसारादिभिर्ग्रन्थैरधिगम्यते। अपि च तेषां गणेशादीनामपि परब्रह्माभिन्नस्वरूपतत्त्वबोधकाः उपनिषत्प्रतिपादिता गणेशैकाक्षरसूर्यैकाक्षरदेव्येकाक्षराशिवपञ्चाक्षरनारायणाष्टाक्षरात्मकाः पञ्च मन्त्रा एवेति उपासनाकल्पसूत्रप्रस्थानत्रयकर्तारो मन्यन्ते। गणेशषडक्षर सूर्याष्टाक्षर देवीपञ्चदशी परमेश्वरद्वादशाक्षरी विष्णुद्वादशाक्षरीमन्त्रा अपि ब्रह्मावबोधका एवेति पाञ्चिकः कल्पः। प्रणवमन्त्रस्य तु ब्रह्मावबोधकत्वं उपनिषदुद्दुष्टं सुप्रसिद्धमेव। अथापि केवलप्रणवजपे तुर्याश्रमिणामेवाधिकारदर्शनात्सर्वेऽप्येते मन्त्रास्सप्रणवा एव त्रैवर्णिकानामुपदिश्यन्ते आचार्यैरिति हृदयम्। अतस्सप्रणवा एते पञ्च मन्त्रा वा दश मन्त्रा वा मतमन्त्रा इति व्यवस्थितम्॥

तथा च ज्ञानसारे—

"मतानामपि पञ्चानां तात्पर्यं निर्गुणं परम्।
ब्रह्मबुध्यैव पूज्यन्ते ह्युपास्यन्ते च पञ्च ते॥

मन्त्राणां जपहोमाद्यैः स्तूयमाना हि देवता।
प्रसन्ना निखिलान्भोगान् पुरुषार्थांश्च यच्छति॥" इति॥

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

योगसारे यथा —

"एवं वै गणनाथश्च पुरुषश्च परशिवः ।
शक्तिर्नारायणश्चैव ज्योतीरूपसमन्विताः ॥

ब्रह्मत्वेनैव प्रोच्यन्ते वेदादिष्वपि षट्सु च ।
पञ्चभ्यश्चैव प्रोच्यन्ते सृष्टिस्तु कालभेदतः ॥

एकमेव परं ब्रह्म पञ्चधा परिकीर्तितम् ॥" इति ॥

श्रीमदप्पय्यदीक्षितेन्द्रैरपि शैवाद्वैतबोधकश्रीकण्ठभाष्यव्याख्याने अयमेव भाव आविष्कृतः ॥ यथा —

"यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानाञ्च निष्ठा
साकं सर्वैः पुराणश्रुतिनिकरमहाभारतादिप्रबन्धैः ।
तत्रैव ब्रह्मसूत्राण्यपि च विमृशतां भान्ति विश्रान्तिमन्ति
प्रत्नैराचार्यरत्नैरपि परिजगृहे शङ्कराद्यैस्तदेव ॥

तथाप्यनुग्रहादेव तरुणेन्दुशिखामणेः ।
अद्वैतवासना पुंसामाविर्भवति नान्यथा ॥

अनुग्रहश्च देवस्य देव्या चिद्रूपया सह ।
यथावत्तं परिज्ञाय ध्यायद्भिस्समवाप्यते ॥" इति ॥

अत्र दीक्षितेन्द्रैः ब्रह्मज्ञानावाप्त्यै न केवलं परमेश्वरानुग्रहमात्रं विवक्षितम्, अपि तु पराशक्त्यनुग्रहोऽपि विवक्षित एव ॥

"ईश्वरप्राणिधानाद्वा" इति पातञ्जलयोगसूत्रव्याख्याने श्री-सदाशिवेन्द्रसरस्वतीपादैरपि अयमेव भावो दृढीकृतः । यथा —

"ईश्वरो हि समाराधनादिना साधनेन आराधितः इदमस्येष्टमस्तु इति संसाराङ्गारे तप्यमानं पुरुषमनुगृह्णातीति भावः ॥" इति ॥

तथा च श्रुतिः—

"मुमुक्षुर्वै शरणमहं प्रपद्ये"

"तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्"

इति ॥

अत्र विष्णोः परब्रह्मत्वावबोधकानि त्रिपाद्विभूतिनारायणोप-निषद्वाक्यानि निदर्शनार्थमुदाह्रियन्ते ॥

यथा—

"कारणात्मकं सर्वं कार्यात्मकं सकलं नारायणः । तदुभय-विलक्षणो नारायणः । परञ्ज्योतिः स्वप्रकाशमयो ब्रह्मानन्दमयो नित्यो निर्विकल्पो निरञ्जनो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् । न स समानाधिक इत्यसंशयं परमार्थतो य एवं वेद । सकलबन्धान् छित्त्वा मृत्युं तीर्त्वा स मुक्तो भवति स मुक्तो भवति ।" इति ॥

एवं गणेशादीनामपि परब्रह्मत्वावबोधिका बह्व्य उपनिषदो विद्यन्त एवेति ज्ञायते ॥

तथा हि योगसारे—

"अद्वैतस्योपनिषदि गाणेशाद्वैतमीरितम् ।
ब्रह्मसन्ध्योपनिषदि सौराद्वैतं प्रकीर्तितम् ॥

भुवनेश्या उपनिषदि शाक्ताद्वैतं समीरितम् ।
नीलकण्ठोपनिषदि शाम्भवाद्वैतमीरितम् ॥

पार्थसारथ्युपनिषदि वैष्णवाद्वैतमीरितम् ॥" इति ॥

प्रायश एतासामुपनिषदामलाभान्नात्र उदाहृता इत्यवधेयम् ॥

अतो गणेशादीनां पञ्चानामपि देवतानां परब्रह्माभिन्नत्वं गणेशादि-मन्त्राणां परब्रह्मस्वरूपतत्त्वबोधकत्वं च सिद्धम् ॥

अथैतासां पञ्चानां देवतानां पूर्णावतारमूर्तयो वल्लभेशसूर्य-नारायणान्नपूर्णानीलकण्ठवासुदेवाद्याः कार्यब्रह्मात्मिका इति तत्स्वरूप-तत्त्वबोधका मन्त्रा आत्मदेवतामन्त्रा इति च व्यपदिश्यन्ते । कार्यकारणयोरभेदान्वयस्य सुगमत्वमिव ब्रह्मात्मनोरभेदान्वयस्य सुगमत्वं बोधयितुं एता देवता आत्मदेवता इति अभिधीयन्ते ॥

स्वाभीप्सितैहिकामुष्मिकसकलेष्टलाभसिद्ध्यर्थं उपास्यमाना देवता इष्टदेवता इति तत्प्रतिपादका मन्त्रा इष्टदेवतामन्त्रा इति च प्रपञ्चितम् । प्रायेणैता देवता मताधिदेवतानामवतारदेवतासु आवरणदेवतासु वा अन्तर्गताः गुरुरक्षाकरार्थसाधकभेदात् त्रिविधाः, उक्तकार्यत्रयसाधिका वा भवन्तीति ॥

तथाच योगसारे —

"इष्टदेवास्त्रिधा प्रोक्ताः गुरुरक्षार्थसाधकाः ।
परलोकज्ञानदाता गुरुदेव इति श्रुतः ॥

सर्वदा स्वात्मरक्षां च विपद्भ्यश्च करोति यः ।
रक्षादेव इति ख्यातः पाण्डवानां यथा हरिः ॥

अर्थदाता शत्रुशिक्षाकरश्चार्थप्रदायकः ॥" इति ॥

उपासनेन परितुष्टा एता देवताः स्वोपासकस्य संभाव्यमानान् सर्वान् क्लेशान् व्यपोह्य स्वयमेव गुरवो भूत्वा तत्त्वावबोधनेनैनं मुक्तिपथं प्रापयन्तीति आचार्या मन्यन्ते ॥

स्वकुलसंभाव्यमानसकलानिष्टनिवृत्त्यर्थं योगक्षेमादिनिखिलश्रेयोभिवृध्यर्थं च स्वकुलवृद्धैः परंपराक्रमेणाराध्यमाना देवताः कुलदेवता इति सर्वजनविदितोऽयं विषयः । तेषां प्रसादजनका मन्त्राः कुलदेवतामन्त्राः । एतासां कुलदेवतानां अनुग्रहेणापि केचिदध्यात्मतत्त्वज्ञा अभूवन्निति विज्ञायते ॥

सकलदुरितनिवृत्त्यर्थं सर्वमङ्गळावाप्त्यर्थं च गृहेष्ववश्यपूजनीयत्वेनाभिहिता वृन्दाद्या देवताः गृहदेवतास्तासां मन्त्रा गृहदेवतामन्त्राः ॥

ग्रामसंभाव्यमानमारीचोराग्निदाहादिबाधाभ्यः ग्रामीणजनद्विपाच्चतुष्पाद्रक्षिकाः हरिहरपुत्रचण्डीकाळीदुर्गाद्या देवता ग्रामदेवताः । तासां मन्त्रा ग्रामदेवतामन्त्राः ।

ब्रह्मा प्रजापतयः इन्द्रादयो लोकपालाः तदधिनाथा देवयोनि-

विशेषाः नवग्रहाः वसवो रुद्रा आदित्या अश्विनाविति त्रयस्त्रिंश-देवतास्तदधिनाथा देवयोनिविशेषा मरुतः आजानजाः कर्मदेवाः देवर्षयो ब्रह्मर्षयः स्वतपोबलान्महर्षित्वमधिगताश्च लोकदेवताः तेषां मन्त्रा लोकदेवतामन्त्रा इति वैश्वदेवमेव लोकदेवताराधनमिति च बोध्यते ॥

तदेवं सप्तधा विभज्याभिहितानां सर्वासामपि देवतानां उपासन-माराधनं च यथोचितं यथाशक्ति यथामति च अवश्यमनुष्ठेयमिति श्रुतिस्मृतीतिहासपुराणादिभ्योऽवगम्यते ॥

अथैतेषां मन्त्राणामुपासनामार्गभेदाश्च निरूप्यन्ते । उपासनामार्ग-स्संक्षेपाद्द्विविधः— वैदिकस्तान्त्रिकश्चेति । वैदिकोऽपि द्विविधः— कर्म-ज्ञानोभयात्मकः कर्मात्मकश्चेति । तान्त्रिकस्तु त्रिविधः— तान्त्रिकः, वामः, पाषण्डश्चेति । अतः वेदोदितमार्गावलंबिनो वैदिकाः, तन्त्रग्रन्थोक्तमार्गाव-लंबिनस्तान्त्रिका इति व्यवस्थितमेतत् ॥

श्रुत्यादिविहितकर्मानुष्ठानपूर्वकं श्रीमच्छंकरभगवत्पादाद्यैः प्रति-ष्ठापितेषु षट्सु मतेष्वन्यतमं स्वाभीप्सितं मतं मुख्यमवलम्ब्य तत्तद्देवतो-पासनाकल्पसूत्रकारैर्महर्षिभिर्निर्युक्तेन मार्गेण सद्गुरोरनुग्रहोपलब्धैः मत-देवतात्मदेवतेष्टदेवतादिमन्त्रैः जपहोमपूजनाद्यैः कर्मभिः तास्ता देवताः प्रत्यहं तर्पयन्तः श्रुतिस्मृतीतिहासपुराणागमाद्यैर्देवतास्वरूपतत्त्व-विचारपराः परब्रह्मावबोधकप्रस्थानत्रयोपनिषदर्थविचारपराः परं ब्रह्म स्वाभिन्नं ध्यायन्तः मननिदिध्यासनादिपराश्च वैदिकोपासका इति व्यवहियन्ते । अतः कर्मज्ञानात्मकद्विविधोपासनपरमा एते वैदिकोपासकाः स्वसत्कर्मनिर्धूतनिखिलकिल्बिषाः स्वोपास्यदेवतानुग्रहविशेषासादिततत्त्वाव-बोधाः योगलभ्यनिखिलसमाधिसिद्धिमन्तः ब्रह्मविदो ब्रह्मनिष्ठाः

प्रारब्धकर्मक्षये ब्रह्मीभूता भवन्तीति श्रुत्यादिभिरुपदिश्यते । अतः अद्वैत-भावापादकं ज्ञानावलम्बनमन्तरङ्गोपासनमद्वैतमिति, मन्त्रजपपूजनादि-बाह्यकरणव्यापारात्मककर्मावलम्बनं बाह्योपासनं मतमिति च श्रीम-च्छंकरभगवत्पादाद्यैः प्राचार्यैर्बहुधा प्रपञ्चितम् ॥

न हि निराकारं निर्गुणं निरवयवं किञ्चिदुपासनाविषयं भवितु-मर्हति । उपासनायां हि उपास्योपासकोपासनाख्यं त्रिपुटीभानमपेक्षितं भवति । अतो मुमुक्षोरादितस्साकारं सगुणं सावयवं गणेशादिरूपं ब्रह्मैव उपासनाविषयं भवितुमर्हति । ततोऽनवरतध्यानाद्यभ्यासवशात् बाह्य-व्यापारवृत्तिमात्रशून्ये चित्ते तादात्म्यभावनाविशेषात् सगुणब्रह्म-साक्षात्कारस्सिध्यति । ततोऽपि निरन्तराभ्यासविशेषात् बाह्याभ्यन्तरवृत्ति-शून्यं चित्तं नश्यति । तदा निर्विकल्पं निराकारं निर्गुणं निरवयवं नित्य-ज्ञानानन्दात्मकमात्मानं जानाति । तदिदं नित्यज्ञानानन्दात्मक-मात्मज्ञानमेव अद्वैतं कैवल्यं ब्रह्मभूयसिद्धिर्मुक्तिरिति च श्रुत्यादि-निखिलवेदान्तशास्त्रैरुपदिश्यते ॥

श्रुत्यादिविहितकर्मानुष्ठानपरा गणेशादिमन्त्रजपपूजादिबाह्यकर्मा-वलंबनमात्रपरा अपि वैदिकोपासका एव । एतेष्वपि केषांचित् देवतानुग्रह-विशेषात् ब्रह्मज्ञानसिद्धिरपि भवत्येवेति महान्तो मन्यन्ते । प्रमाणानि चात्रोपलभ्यन्त एव । कार्यब्रह्मोपासकानामेतेषां कार्यब्रह्मलोकावाप्तिरेव फलं प्रतिपाद्यते ॥

अतो वैदिकोपासनामार्ग एव निश्रेयससाधनमिति पर्यवसन्नोऽर्थः ॥

तान्त्रिकोपासनामार्गभेदास्त्रयः— तान्त्रिको वामः पाषण्डश्चेति ।

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

अतस्तच्छीलास्तान्त्रिका वामाः पाषण्डाश्चेत्यभिधीयन्ते । श्रुत्यादिविहित-कर्मानुष्ठानसदाचारविहीनाः देवतास्वरूपतत्त्वज्ञानविहीनाः अतिनश्वर-फलमात्रकामनया मन्त्रजपादिक्रियामात्रपराः तान्त्रिकाः, श्रुत्यादिनिषिद्धै-र्दोषापादकैर्मधुमांसादिभिः देवतातोषणपरा वामाः, स्वशरीरोत्कर्तनाद्यै-रुपलब्धरक्तमांसादिभिः हिंसात्मकातिनिन्दितजीवबलिदानादिभिश्च देवता-तर्पणशीलाः पाषण्डा इत्युच्यन्ते । एतानवैदिकान् नियमयितुमेव तन्त्रशास्त्रं प्रवर्तितमिति महद्भिर्बहुधा समुपन्यस्तम् । अथापि केवलतान्त्रिको मार्गः अवैदिकोऽपि निःश्रेयससाधनतयाऽनङ्गीकृतोऽपि देवताप्रसादजनकत्वात् नातितरां निन्द्यः । अपरौ वामपाषण्डौ तु निन्द्यौ निरयदौ चेति निषिद्धौ ॥

अतो वैदिकमार्गोपासनासाधनीभूतास्त्रयोऽपि मन्त्रा आत्मज्ञान-साधनीभूता एवेति अनवद्योऽयमाशयो बहूनां महतां मान्यानामाचार्याणा-मिति शिवम् ॥

इत्थं

क्षे. शं. सुब्रह्मण्यशास्त्री,

गाणेशाद्वैती ।

॥ मन्त्रशास्त्रमातृकानुक्रमिका ॥

Bundle No.	Supplemental No.	Burnell's No. of Mss.	O. S. R. No. of Mss.	No. less Mss.	No. Nil. Mss.	No. of missing Mss.
1	1	6682				
2	2—10	6683 - 6691				6692
3	11—14	6693—6696				
4	15—18	6697—6700				
5	19—21	6701—6703				
6	22	6704				
7	23& 24	6705 & 6706				
8	25—28	6707—6710				
9	29& 30	6711 & 6712				
10	31—37	6713—6722				6715, 6718 & 6720
11	38-162	6723—6819	14840—14872		1	14841—14845
12	163-253	6820—6902	14873—14876	1—4	2	6864 & 6871

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

Bundle No.	Supplemental No.	Burnell's No. of Mss.	O. S. R. No. of Mss.	No. less Mss.	No. Nill Mss.	No. of missing Mss.
13	254-342	6903—6994		1—3		6940, 6950, 6951, 6964, 6968 & 6969
14	343-389	6995—7039	14584& 14519			
15	390-475	7040—7122	14877—14879			14880
16	476-574		14501—14599	2—5	2	14578, 14579, 14582 & 14584 & 14597
17	575-607	7123—7126(d)		1- 27 4 ಅ 2		10, 14, 18 & 23
18	608-676	7127—7142	14881—14904	1-5 each 2, 6—27	1	26, 14891 & 14895
19	677-680	7143—7146				
20	681-736	7147—7190	14905—14910	2—6		1
21	737-773	7191—7222		1—4	1	7216
Palm leaf.	774-1045	12008-12284				12040, 12154, 12188, 12190, 12191, 12220, 12225 & 12234

RESEARCH CENTRE
DEPARTMENT OF EDUCATION (HIGHER)

J. L. T. S. Etc.	Bundle No.	Supplemental No.	No. of Mss.	No. less Mss.	Remarks.
J. L.	6	1046—1109	404—557	1 – 34	अत्र संभाव्यमानासु मातृकासु मन्त्रशास्त्रबाह्याः 38 मातृका न भवन्ति । अतो मन्त्रशास्त्रसंबद्धा मातृका परं सङ्गता भवन्तीति ज्ञेयम् ॥
,,	10	1110—1176	465—489	1—23	
,,	13	1177—1194	474—590	1—5	
T. S.	30	1195—1218	1010-1033		
P. A.	5	1219 - 1233	250—266		
G. K. D.	6	1234 & 1235	259—278		
K. M.	1	1236—1320	3—104		15, 16, 73 & 87 = 4 Mss. Missing

॥ श्रीगणेशाय नमः ॥

॥ मन्त्रशास्त्रग्रन्थसूचिकायाः शुद्धाशुद्धपाठः ॥

Page No.	शुद्धपाठः	अशुद्धपाठः
191	No. less. 1	Burnell's No No less. 1
192	No. less. 2	,, ,, ,, 2
,,	No. less. 3	,, ,, ,, 3
376	Burnell's No. 7213	Burnell's No. 7231
381	Sup No. 765	Sup No. 768
383	No. Nil	No.
,,	Bundle No. 21 No less 1	Bundle No. 21
,,	Bundle No. 21 No. less. 2	,,
459	19 मूलिकाविधिः	10 मूलिकाविधिः
496	No. 12123	No. 12122
,,	No. 12124	No. 12123

॥ श्रीगणेशाय नमः ॥

A

DESCRIPTIVE CATALOGUE

OF THE

MANTRA ŚĀSTRA MANUSCRIPTS

IN THE

TANJORE MAHĀRĀJA SERFŌJI'S

SARASVATĪ MAHĀL LIBRARY.

श्रीमन्मन्त्रशास्त्रग्रन्थानां सूचीपत्रम् ॥

॥ प्रपञ्चसारसारसङ्ग्रहः ॥

PRAPAÑCASĀRASĀRASAÑGRAHA

ப்ரபஞ்சஸாரஸாரஸங்கிரஹம்

Supplemental No. 1. Bundle No. 1. Burnell's No. 6682
Substance—Paper. Sheets—1—586 + Index 6 = 592.
Script—Devanāgarī. No. of Granthas—16000. Complete (1-32 Paṭalas). Author—Gīrvāṇendrasaraswati.

Beginning ;

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

नत्वा श्रीशङ्कराचार्यममरेन्द्रयतीश्वरम् ।
कुर्वे प्रपञ्चसारस्य सारसङ्ग्रहमुत्तमम् ॥

End :

शङ्करश्चामरेन्द्रश्च विश्वेश्वर इति त्रयः ।
पुनन्तु मामकीं बुद्धिमाचार्याः कृपया मुदा ॥
अमरेन्द्र इति (यतिः) शिष्यो गीर्वाणेन्द्रस्य योगिनः ।
तस्य विश्वेश्वरश्शिष्यो गीर्वाणेन्द्रोऽहमस्य तु ॥
शिष्यः प्रपञ्चसारस्य व्यदधां सारसङ्ग्रहम् ।
येनं (एनं) दृष्ट्वाऽखिलास्सन्तस्सन्तुष्टास्सन्तु सन्ततम् ॥
साध्वसाधुविवेकेन लिखितं वापि यन्मया ।
तदपि प्रियशिष्यत्वात्स्वामी वीक्ष्याभिनन्दतु ॥
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥
हरिः ॐ ॥ शुभमस्तु ॥ श्रीसाम्बसदाशिवो रक्षतु ॥
श्रीगुरुभ्यो नमः ॥ श्रीशुभमस्तु ॥
यश्शिवो नामरूपाभ्यां या देवी सर्वमङ्गळा ।
तयोस्संस्मरणात्पुंसां सर्वतो जयमङ्गळम् ॥

Colophon :

इति गीर्वा[illegible]विरचिते प्रपञ्चसारसारसंग्रहे द्वात्रिंशः पटलः ॥

Subject :

१. एकाक्षरादिपञ्चदशगणेशमन्त्राः, तेषां यन्त्राणि प्रयोगाश्च ।

२. सूर्याष्टाक्षरमन्त्रः, प्रयोजनतिलकाख्योऽन्यो मन्त्रः, तयोर्यन्त्रे प्रयोगाश्च ॥

३. एकाक्षरदेवीमन्त्राः, श्रीविद्यापञ्चदशीमन्त्रभेदाः, अन्नपूर्णाबाला-लक्ष्मीसरस्वत्यादिस्त्रीदेवतामन्त्राः पञ्चाशतोऽधिकाः, तेषां न्यासाः यन्त्राणि प्रयोगाश्च ॥

४. शिवपञ्चाक्षरमन्त्रः, नीलकण्ठदक्षिणामूर्त्यादिशैवमन्त्राः, द्वात्रिंशतोऽधिकाः, तेषां यन्त्राणि प्रयोगाश्च ॥

५. नारायणाष्टाक्षरमन्त्रः, रामकृष्णादिविष्ण्ववतारदेवतामन्त्राः, गरुडहनुमदादिमन्त्राश्च त्रिंशदधिकाः, तेषां यन्त्राणि प्रयोगाश्च ॥

६. इन्द्रादिलोकदेवतामन्त्राः, नवग्रहमन्त्राः, नानाफलदा ऋष्यन्त्राश्च पञ्चविंशत्युत्तरशताधिकाः, तेषां प्रयोगादयश्च ॥

७. सिद्धारिक्रृणधनशोधनमन्त्रदोषतन्निवर्तकोपायादयः, तान्त्रिकसंज्ञापरिभाषादयश्च सम्यक् प्रतिपादिताः ॥

Remarks—The Ms. is in good condition. This is not printed.

இந்த நூல், ஸர்வாணேந்திரஸரஸ்வதியவர்களால் செய்யப் பட்டது. இது ஸ்ரீமதாதிசங்கரபகவத்பாதாளால் செய்யப்பட்ட பிரபஞ்சஸாரத்தைத் தழுவி, க்ரமதீபிகை, மந்திரதேவதா பிரகாசிகை, சாரதாதிலகம், முதலிய பல நூல்களை அனுஸரித்து எழுதப்பட்டது.

இதில் ஏகாக்ஷரம் முதலிய கணபதி மந்திரங்களும், சிவபஞ்சாக்ஷர மந்திரங்களும், நீலகண்ட தக்ஷிணமூர்த்தி அகோர வீரபத்ராதி சைவமந்திரங்களும், ஸூர்ய மந்திரங்களும், தேவீ பஞ்சதசீ, பாலை அன்னபூர்ணை முதலிய பல தேவீ மந்திரங்களும், அஷ்டாக்ஷர மந்திரமும் ராமகிருஷ்ணாதி வைஷ்ணவ மந்திரங்களும், இந்திராதி லோகதேவதாமந்திரங்களும், கவக்ரஹ மந்திரங்களும், பல வேத மந்திரங்களும், மந்திர சாஸ்திர ஸம்பந்தமான ஸகல ஸம்ஜ்ஞை பரிபாஷைகளும் கன்கு கூறப்பட்டிருக்கின்றன.

॥ सिद्धनागार्जुनतन्त्रम् ॥

SIDDHANĀGĀRJUNATANTRAM

ஸித்தநாகார்ஜுநதந்திரம்

Supplemental No. 2. Bundle No. 2. Burnell's No. 6688. Substance—Paper. Sheets—1-46+Index 8=49. Script—Devanāgarī. No. of Granthas—2000. Complete (1-20 Paṭalas.) Author—Siddhanāgārjuna.

Beginning :

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीरामचन्द्राय नमः ॥

श्रीगुरुभ्यो नमः ॥ अथ सिद्धनागार्जुनो(नीयं) लिख्यते ॥

अन्तरायतिमिरौघशान्तये
शान्तये(पा)वनमाचिन्त्यवैभवम् ।
तन्नरं वपुषि कुञ्जरं मुखे
अद्रिजे(जा)विमलतुष्टि(न्दि)लं महः ॥

End :

पूर्वफल्गुननक्षत्रे ग्राह्यं दाडिमबन्धकम् ।
करे बद्धा भवेद्वश्यो यदि राजा पुरन्दरः ॥
श्रीरामाय नमः ॥ सिद्धनागार्जुनं (नीयं) समाप्तम् ॥

श्रीविश्वनाथाय नमः ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
अवद्धं वा सुवद्धं वा मम दोषो न विद्यते ॥
परियधावि (परिधावि)नामसंवत्सरे माघशुद्धद्वादशीभौमवासरे इदं सिद्धनागार्जुनपुस्तकं लिखितम् ॥

Colophon :

इति सिद्धनागार्जुनविरचिते कक्षपुटे सर्वसङ्ग्रहं(हो) नामे(म) विंशतिपटलः ॥

Subject ;

षट्कर्मप्रयोगार्हा मन्त्राः । तत्तत्कर्मोचिततन्त्राणि । पशुपक्षिमनुष्यगतिमस्तितम्भनादिप्रयोगविधयः। अस्त्रशस्त्रस्तम्भनखण्डनादिविधयः। अग्न्यादिदिव्यस्तम्भनविधयः । विद्युत्स्तम्भनविधिः । नानारोगोत्पादनविधयः । अस्त्रास्त्रलाभविधिः । नानाकौतुकदर्शनविधयः । अदृश्यकरणाद्यञ्जनविधयः । पादुकाघुटिकाखेचरादिसिद्धिक्रमाः । म्रियमाणजीवनोत्पादनविधिः । मृतसञ्जीविनीमन्त्रप्रयोगादयः । वन्दाकप्रयोगाश्च सम्यक् प्रतिपादिताः ॥

Remarks:—The Ms. is in good condition. The Ms. abruptly breaks in the beginning of 21st paṭala.

இந்நூல் ஸித்தநாகார்ஜுனனால் எழுதப்பட்டது. இதில், ராஜா, மந்திரி, ஸ்திரீ புருஷர் முதலியவர்களின் வசியம், முதலிய ஆறுவித பிரயோகங்களும், பசு பக்ஷி மிருகங்கள், மனிதர்கள், அக்னி வாயு ஜலம், முதலியவற்றின் கதிமதி ஸ்தம்பனங்களும், இடி மின்னல் முதலியவைகளை ஸ்தம்பனம் செய்யும் முறைகளும், பலவித ஜாலவித்தைகள் காட்டும் முறைகளும், பாதுகாஸித்தி, குடிகாஸித்தி, ஆகாசகமனஸித்தி, மறைவு, முதலியவைகளும், இறந்தவனை பிழைக்கவைக்கத் தக்க முறைகளும், பில்லுருவி பிரயோகங்களும் கூறப்பட்டிருக்கின்றன.

॥ सिद्धनागार्जुनीयम् ॥

SIDDHANĀGĀRJUNĪYAM

ஸித்தநாகார்ஜுநீயம்

Supplemental No. 3-8. Bundle No 2. Burnell's No. 6684-6689 (6 Mss.) Substance—Paper. Sheets—8, 10, 8, 12, 8 & 13. No. of Granthas-120, 204, 150, 215, 145 & 200. Portions Complete. Author—Siddhanāgārjuna.

Beginning, End & Colophon: Same as in Ms. No. 6686.

Subject:

आसु षण्मातृकासु क्रमेण १, ६, ७, १३, १८, १४. पटलाः सन्ति. [एकैका मातृका एकैकपटलात्मिकेत्यवधेयम्]

Each Ms. contains one Paṭala namely, 1, 6, 7, 13, 18, & 14, respectively.

Remarks—These Mss. are in good condition.

॥ क्रमदीपिका ॥

KRAMADĪPIKĀ

கிரமதீபிகை

Supplemental No. 9 A. Bundle No. 2. Burnell's No. 6690 A

Substance—Paper.—Sheets—1—31 (Text—sheets 1-31; commentary—Sheets 31-66) Script—Devanāgarī. No. of Granthas—1100. Complete—(I-8 Paṭalas) Author—Keśava Bhaṭṭa. (?)

Beginning.

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ॥

श्रीकुलस्वामिने नमः ॥

कलात्तमायालवकान्तमूर्तिः कलक्वणद्वेणुनिनादरम्यः ।
श्रितो हृदि व्याकुलयंस्त्रिलोकीं श्रियेऽस्तु गोपीजनवल्लभो वः ॥

End.

जनमिममनुविद्धो (द्धा)येन यस्मिन्प्रसूते
यदनुततमजस्रं पाति चाधिष्ठिता यम् ।
यदुरुमनुउदर्च्चियं विधत्ते च गोपी
तममृतसुखबोधज्योतिषं नौमि कृष्णम् ॥

Colophon:

इति श्रीक्रमदीपिकायामष्टमः पटलः ॥ क्रमदीपिका समाप्ता ॥

Subject:

गोपालोपासनाकल्पः । न्यासाः मुद्रालक्षणानि । कृष्णस्वरूपवर्णनं । षडक्षराष्टाक्षर - विंशत्यक्षर - द्वाविंशत्यक्षर - त्रिंशदक्षराष्टाचत्वारिंशदक्षरादि-गोपालमन्त्राः, तेषां सिद्धिक्रमः, प्रयोगाः, कृष्णसपरिवारणपूजाविधिः, कृष्णोपासनामहिमा च प्रतिपादिताः ॥

Remarks—The Ms. is in good condition.

॥ भावदीपिका ॥ [क्रमदीपिकाव्याख्या]

BHĀVADĪPIKĀ

பாவதீபிகை (க்ரமதீபிகைக்கு உரை)

Supplemental No. 9 B. Bundle No. 2. Burnell's No. 6690 B
Substance—Paper. Sheets—31-66 (Sheets 1-31 Text, 31-

66 commentary.) Script—Devanāgarī. No. of Granthas 1200. Incomplete (1-6½ Paṭalas). Author—Nityaprajña.

Beginning :

आलीढवेणुमरुणाधरपल्लवेन
गोपाङ्गनाप्रणायिनं प्रणिपत्य कृष्णम् ।
सत्संप्रदायसरणीमनुसृत्य कुर्वे
व्याख्यां मुकुन्दयजनक्रमदीपिकायाः ॥

End :

संविदं ब्रह्मज्ञानं । तयेति ङेन्तमित्यर्थः ।
अस्त्यग्निमायाश्रीत्यक्षरं ङेन्तमित्यर्थः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यप्राज्ञशिष्येण नित्यप्रज्ञेन वनापरनामधेयेन विरचितायां क्रमदीपिकाभ(भा)वदीपिकायां षष्ठः पटलः ॥

इति भावदीपिकायां षष्ठः पटलः ॥

Subject : क्रमदीपिकाव्याख्या ॥

Remarks—The Ms. is in good condition. The Ms. abruptly breaks in the middle of 7th Paṭala.

இதில் 1-31 பக்கங்கள் கிரமதீபிகை மூலம். 31-66 பக்கங்கள் கிரமதீபிகையின் உரை. கிரமதீபிகை 1-8 படலங்கள். கிரமதீபிகையின் உரையில் 1-6½ படலங்கள்தான் இருக்கின்றன.

கிரமதீபிகையில் ஸ்ரீ கிருஷ்ண மந்திரங்களில் 6, 8, 20, 22, 30, 48, அக்ஷரங்களுள்ள பல மந்திரங்களும், அவைகளுக்கு நியாஸங்களும், ஸித்தி முறைகளும், கிருஷ்ணஸப்தாவரண பூஜாவிதியும், கிருஷ்ணோபாஸனத்தின் பெருமையும், கூறப்பட்டிருக்கின்றன.

॥ श्रीशिवार्चनचन्द्रिका ॥

SRI ŚIVĀRCANACANDRIKĀ

ஸ்ரீ சிவார்ச்சநசந்திரிகை.

Supplemental No. 10. Bundle No. 2. Burnell's No. 6691 Substance—Paper. Sheets—1-172(+Index 3 + 7=182) Script—Devanāgarī. No. of Granthas—5940. Complete—(1-16 prakāśas.) Author—Srīnivāsa Bhaṭṭa.

Beginning :

श्रीमहागणपतये नमः ॥ श्रीदक्षिणामूर्तये नमः ॥ श्रीगीर्वाणेन्द्रयोगिने नमः ॥ ॐ ॥

श्रीमन्तं सिन्दुरास्यं शशिशकलधरं बन्धुजीवाभिरामं
दानाम्भस्सिक्तगण्डस्खलदळिकलभाँल्लीलया खेलयन्तम् ।
प्रत्यूहध्वान्तभानुं पृथुतरजठरं ब्रह्मविष्ण्वीशवन्द्यं
वन्दे सिन्दूरपूरैर्गिरिवरसुतया चर्चितोत्तुङ्गकुम्भम् ॥

End :

सुन्दराचार्यशिष्येण श्रीनिवासेन धीमता ।
चन्द्रिकायां प्रणीतायां प्रकाशष्षोडशोऽगमत् ॥

Colophon :

इति श्रीसुन्दराचार्यचरणारविन्दद्वन्द्वान्तेवासिना श्रीश्रीनिवासभट्टेन विरचितायां श्रीशिवार्चनचन्द्रिकायां षोडशः प्रकाशः ॥

Subject :

शैव शाक्त सौर गाणेश वैष्णव मन्त्राः । नित्यनैमित्तिककाम्यपूजाविधिः । पञ्चानां देवतानां पीठपूजा । आवरणपूजा । उत्थानादिशयनान्तं इतिकर्तव्यताविधिः । मुद्रालक्षणानि । यन्त्राणि काम्यप्रयोगाः । सिद्धिक्रमः । दीक्षाविधिः । तान्त्रिकग्रन्थसामान्यभूताः सर्वे च विषयाः सम्यक् निरूपिताः ॥ विस्तृता विषयसूचिकापि वर्तते ॥

Remarks—The Ms. is in good condition.

ஸ்ரீ சிவார்ச்சாசந்திரிகை என்பது ஓர் சிறந்த நூல். இதில் பஞ்சாக்ஷரம் முதலிய சைவமந்திரங்களும், ஸ்ரீவித்யை முதலிய சாக்தமந்திரங்களும், அஷ்டாக்ஷரம் முதலிய ஸௌர வைஷ்ணவ மந்திரங்களும், பல கணபதி மந்திரங்களும், அவைகளின் ஸித்திக்கிரமங்களும், நித்யநைமித்திக காம்ய பூஜைகளும், ஆவரணபூஜைகளும், பல காம்யபிரயோகங்களும், அவைகளுக்கான யந்திரங்களும், ஸித்தாரிசோதகம் முதலிய வைகளும் மந்த்ரதோஷங்கள், அவைகளுக்கு பரிஹாரங்கள், முதலிய பல விஷயங்களும் கூறப்பட்டிருக்கின்றன. இதற்கு விவரமான விஷய அட்டவணையும் இருக்கிறது.

॥ शारदातिलकम् ॥

ŚĀRADĀTILAKAM

சாரதாதிலகம்

Supplemental No. 11. Bundle No. 3. Burnell's No. 6698
Substance—Paper. Sheets—1-117 (+Index10=127.)
Script—Devanāgarī. No. of Granthas—3400. Complete—(1-25 Paṭalas.) Author—Sri Lakṣmaṇa Deśikendra.

Beginning :

श्रीगणेशाय नमः ॥

नित्यानन्दवपुर्निरस्तल(न्तर)ग[ल]त्पश्वा(श्वा)शदस्थैः(र्नैः) क्रमा-
द्व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाद्व(ङ्क)सदनं वाचामधीशं महः ॥

End ;

अनाद्यन्ता शंभोर्वपुषि कलिताऽर्धेन वपुषा
जगद्रूपं पश्यं(नश्य)त्सृजति महती(नी)यामपि गिरम् ।
सदर्था शब्दार्थस्तनभरनता शंकरवधू-
र्भवद्भृत्यै भूयाद्भवजनितदुःखौघशमनी ॥

Colophon :

इति श्रीशारदातिलके पञ्चविंशः पटलः ॥ श्रीशिव ॥ श्रीशिव ॥ श्रीशिव ॥ श्रीशिव ॥

Subject :

पञ्चदेवतामुख्यमन्त्राः । तेषां अवतारमूर्तिमन्त्राः । यन्त्राणि। तेषां पीठपूजा । आवरणपूजा । न्यासः । शैववैष्णवशाक्ताष्टगन्धद्रव्याणि । पुरश्चर्याविधिः । दीक्षाकालादितान्त्रिकसामान्यविषयाश्च प्रतिपाद्यन्ते ॥

Remarks:—The Ms. is in good condition. The sheets of Index are smaller than the sheets of Text.

இது ஒரு சிறந்த நூல். இதில் சைவ, சாக்த, வைஷ்ணவ ஸௌர, காணேச மந்திரங்கள், அவைகளின் ஸித்திக்கிரமங்கள், யந்திரங்கள், பீடபூஜைகள், ஆவரண பூஜைகள், ந்யாஸங்கள், சைவ வைஷ்ணவ சாக்த அஷ்டகந்தங்கள், தீக்ஷாகாலங்கள், முதலிய ஸகல விஷயங்களும் கூறப்பட்டிருக்கின்றன.

இத்துடன் விவரமான விஷய அட்டவணையும் இருக்கிறது.

॥ हर्षकौमुदी [शारदातिलकव्याख्या] ॥

HARSAKAUMUDĪ

ஹர்ஷகௌமுதீ

Supplemental No. 12. Bundle No. 3. Burnell's No. 6694 Substance—Paper. Sheets—1-281. Script—Devanāgari. No. of Granthas—6500. Incomplete (1-19 Paṭalas Complete). Author—Vātsya Śri Harṣa.

Beginning :

श्रीगुरुभ्यो नमः ॥

श्रीरामनारायणविष्णुकृष्णब्रह्माम्बिकाशंकरवासुदेवाः ।
यस्य स्वरूपं जगतोंवरस्य नीरस्वरूपं पुरुषं भजामः ॥

End :

क्षेत्रपालमन्त्रमाह— वर्णान्त्यमिति । वर्णात्पक्षः (वर्णान्त्यः क्षः) । हृत् नमः । प्रणवः । ततः ॐ क्षौं क्षेत्रपालाय नमः ॥

Colophon :

इति शारदातिलकटीकायां हर्षकौमुद्यां एकोनविंशतिमं पटलं संपूर्णम् ॥

Subject :

शारदातिलकस्य व्याख्या ॥

Remarks:—The Ms. is in good condition. The Ms. abruptly breaks in the middle of 20th Paṭala.

இது 'சாரதா திலகம்' என்ற பிரஸித்தமான மந்த்ர சாஸ்திரத்தின் விரிவுரை.

॥ शारदातिलकम् ॥

ŚĀRADĀTILAKAM

சாரதாதிலகம்

Supplemental No. 13. Bundle No. 3. Burnell's No. 6695 Substance—Paper. Sheets—1-14+1=15. Script-Devanāgari. No. of Granthas—150. Incomplete. Author—Lakṣmaṇa Deśikendra.

Beginning :

श्रीगणेशाय नमः ॥

नित्यानन्दवपुर्निरन्तरगलत्पञ्चाशदर्णैः क्रमात्
व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कसदनं वाचामधीशं महः ॥

End :

कुण्डोदर्यूर्ध्वकेशी च तथा विकृतमुख्यपि ।
ज्वालामुखी तथा ज्ञेया पश्चादुल्कामुखी ततः ॥
सुश्रीमुखी च विद्यामुखे ++॥

Colophon :

इति शारदातिलके प्रथमः पटलः ॥

Subject :

शारदातिलके प्रथमपटलमात्रम् ॥

Remarks:—The Ms. is in good condition. The Ms. abruptly breaks in the middle of 2nd paṭala.

The 15th sheet is a fragment from a work in Āyurveda & treats of Svayathu (swelling).

॥ शारदातिलकम् ॥

ŚĀRADĀTILAKAM

சாரதாதிலகம்

Supplemental No. 14. Bundle No. 3 Burnell's No. 6696 Same as in Ms. No. 6693.

Remarks:—The Ms. is in good condition. There are 16 verses of Nāḍī Nirṇayam on the title page. The year Samvat 1845 is given at the end of the Ms. At the end of the Ms. is written in Marāthi language as follows :—

"The Ms. was purchased and brought by Śri Serfoji Mahārāja from Benares."

॥ मन्त्रशास्त्रसङ्ग्रहः ॥

MANTRA ŚĀSTRA SAṄGRAHAH

மந்திரசாஸ்திரஸங்கிரஹம்

Supplemental No. 15. Bundle No. 4. Burnell's No. 6697 A, B, C, & D. Substance—Paper. Sheets—1-83+1-41+1-13+1+70=207. Script—Devanāgarī No. of Granthas —906+445+124+771=2246. Incomplete—(1—4 Adhyāyās). Author—Śri Tulajā Mahārāja.

Beginning :

श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः । श्रीकुलस्वामिने नमः ।

नत्वा श्रीशङ्कराचार्यं दीपाम्बामेकभूपतिम् ।
क्रियते तुळजेन्द्रेण मन्त्रशास्त्रस्य सङ्ग्रहः ॥

End :

देवीमाहात्म्यस्य प्रतिश्लोकं पायसैस्तिलैस्सर्पिषा पञ्चामृतैश्च जुहुयात् ॥

Colophon :

इति श्रीमहाराजतुळजेन्द्रविरचिते मन्त्रशास्त्रसङ्ग्रहे देवीविषयो नाम चतुर्थोऽध्यायः ॥

Subject :

१. दीक्षाकालमन्त्रदोषवर्णौषध्यासनफलादयः । पुष्पदन्त, नन्दिकेश्वर, मार्कण्डेय, भगवत्पादशिवमहिम्नस्तोत्राणि च प्रथमाध्याये ॥

२. वल्लभगणपतिमन्त्रः, शिवपञ्चाक्षरनीलकण्ठादिशैवमूर्तिमन्त्राः, अजपा चेति पञ्चदशमन्त्राः । तेषां सिद्धिक्रमः । यन्त्राणि । प्रयोगाश्च द्वितीयाध्याये ॥

३. सूर्यार्घ्यविधिः । चन्द्राग्निसन्मथसुदर्शनहयग्रीवसन्तानगोपाल-मन्त्राः । तेषां प्रयोगाश्च तृतीयाध्याये ॥

४. भुवनेशीललितादिदेवतामन्त्राः सप्तदश । तेषां सिद्धिक्रमः । यन्त्राणि । प्रयोगाश्च चतुर्थाध्याये ॥

Remarks:—The Ms. is in good condition.

இந்நூலில் அடங்கியுள்ள விஷயங்களை அடுத்த கம்பரில் பார்க்கவும்.

॥ मन्त्रशास्त्रसङ्ग्रहः ॥

MANTRA ŚĀSTRA SAṄGRAHAH

மந்திரசாஸ்திரஸங்கிரஹம்

Supplemental No. 16. Bundle No 4. Burnell's No. 6698.

Substance—Paper. Sheets—1—227. Script—Devanāgarī. No. of Granthas—2544. Complete—(1—5 Adhyāyas). Author-Śri Tulajā Mahārāja.

Beginning ;

नत्वा श्रीशङ्कराचार्यं दीपाम्बामेकभूपतिम् ।
क्रियते तुळजेन्द्रेण मन्त्रशास्त्रस्य सङ्ग्रहः ॥

End :

दशांशं योनिकुण्डे तु हुत्वा देवी प्रसीदति ।
विचित्रा साधकस्यैव प्रयच्छेदीप्सितं फलम् ॥

ह्रूं जुं सः पुष्कलावर्तकाभ्यां नमः मेघवृष्टिं कुरु कुरु ॥

Colophon :

इति श्रीमहाराजतुळजेन्द्रविरचिते मन्त्रशास्त्रसङ्ग्रहे पञ्चमोऽध्यायः ॥

Subject :

१—४ अध्यायेषु No. 6697 मातृकागता विषया एव । पञ्चमाध्याये तु ज्वरधन्वन्तारिघण्टाकर्णवैश्रवणाचित्रसेननवग्रहव्यासशंकरनारायणार्धनारीश्वरचिन्तामणियक्षिणीपुष्कलावर्तकमन्त्राः । प्रायेणैतेषां प्रयोगाश्च सन्ति ॥

Remarks:—The Ms. is in good condition. The Mahimnastava is after the 1st Adhyāya in Ms. No 6697. The same is found after the 5th Adhyāya in this Ms.

இந்த நூல் ஸ்ரீ துளஜா மஹாராஜாவினால் இயற்றப்பட்டது. இதில் தீக்ஷாகாலம் முதலிய பொதுவான விஷயங்களும், வல்லபகணபதிமந்திரமும், பஞ்சாக்ஷரம், நீலகண்டம், முதலிய 15 சைவ மந்திரங்களும், புவநேச்வரி, லலிதை, முதலிய ஸ்திரீ தேவதா மந்திரங்கள் 17ம், ஸூரியன், சந்திரன், அக்னி, மன்மதன், ஸுதர்சனம், ஹயக்ரீவர், ஸந்தானகோபாலன் ஆகிய தேவதாமந்திரங்களும், அவைகளின் ஸித்திமுறைகள் பிரயோகங்களும் கூறப்பட்டிருக்கின்றன.

॥ मन्त्रशास्त्रसङ्ग्रहः ॥

MANTRA ŚĀSTRA SAṄGRAHAH

மந்திரசாஸ்திரஸங்கிரஹம்

Supplemental No. 17. Burnell's—6699. Sheets—168 (58-61 missing). Same as in Ms. No. 6698.

Remarks :

स्थितिस्समीचीना ॥ वर्णोपधिविध्यात्मकं 58—61 पत्रचतुष्टयं नष्टम । Ms. No 6698 मातृकायां विद्यमानानि स्त्रोत्राणि न विद्यन्त इति विशेषः ॥

॥ स्वयंवरामन्त्रविधानम् ॥

SWAYAMVARĀMANTRA VIDHĀNAM

ஸ்வயம்வராமந்திரவிதாநம்

Supplemental No. 18. Bundle No. 4. Burnell's No. 6700 Substance—Paper. Sheets—1—20+1=21. Script—Devanāgarī. No. of Granthas—225. Complete.

Beginning :

श्रीगणेशाय नमः ॥ अथ मातङ्गेश्वरीमन्त्रप्रसङ्गात् शाक्तेयत्वसामान्येन स्वयंवरामन्त्रविधानं मन्त्रसारोक्तमपि योग्यतावशाल्लिख्यते ॥

End :

एषु स्थानेषु पञ्चभिर्बाणमन्त्रैर्दशावृत्त्या न्यसेत् इत्याभिप्रायः । पश्चात्काममन्त्रं जपेच्च ॥

Colophon : Nil.

Subject :

स्वयंवरापार्वतीमन्त्रः । न्यासः । यन्त्रं । पूजा । प्रयोगाः । पञ्चबाणन्यासश्च ॥

Remarks:—The Ms. is in good condition. This is a portion of Prapañcasārasārasangraha.

இதில் ஸ்வயம்வராபார்வதீ மந்திரம், யந்திரம், பிரயோகங்களும், பஞ்சபாண கியாஸமும் இருக்கின்றன.

॥ मन्त्रदेवताप्रकाशिका ॥

MANTRADEVATĀPRAKĀŚIKĀ

மந்திரதேவதா பிரகாசிகை

Supplemental No. 19. Bundle No. 5. Burnell's No. 6701. Substance—Paper. Sheets—1—179 + 1=180 + Index I—14=194. Script—Devanāgarī. No. of Granthas—3540 + Index 200=3740. Complete—(1—22 paṭalas) Author—Viṣṇu Deva.

Beginning :

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः ॥

ॐकारात्माक्षराधीभुवनपशिवविद्दक्षिणामूर्तियी(गी)ता-
रत्नत्रय्यम्बकोद्यन्मृतिहरणमहागाणपत्यादिरूपिन् ।
अष्टार्णद्वादशार्णा(र्ण)प्रियनृहरितनो श्रीवराहश्च चक्रि-
कृष्णात्मन् राम विष्णो विविधगुणमहाशक्तिमास्वन्नमस्ते ॥

End :

श्रीमत्प्रपञ्चसारादि.....(मन्त्र)शास्त्र...(स्य)सङ्ग्रहः ।
कृतिर्विजयते सैषा मन्त्रदैवप्रकाशिका ॥

परमारा...लक्ष्मीशः... ... ... ।
कृतिः श्रीविष्णुदेवस्य श्री... ...(मत्) कोटीश्वरेऽर्पिता ॥

Colophon :

इति मन्त्रदेवताप्रकाशिकायां ... ...
द्वाविंशः पटलः । श्रीपरमेश्वरार्पणमस्तु । शुभमस्तु ॥

Subject :

पञ्चदेवतामन्त्राः । तदंशावतारदेवतामन्त्राः । लोकदेवतामन्त्राः । काम्यैकफलदा मन्त्राः । तत्तद्देवतापीठपूजा । न्यासाः । आवरण-पूजा । यन्त्राणि । प्रयोगविधयः । गुरुशिष्याग्निकुण्डमाला-लक्षणानि । आसनफलम् । मन्त्रदोषतत्परिहारोपायादयश्च सम्यक् प्रतिपाद्यन्ते ॥

Remarks—The Ms. is in good condition.

இந்நூலியற்றியவர் விஷ்ணுதேவர். இதில் கணபதி, ஸூரியன், சக்தி, சிவன், விஷ்ணு, இவர்களின் முக்கிய மந்திரங்களும், அவர்களின் அம்சாவதார தேவதைகளான, நீலகண்டர், பைரவர், ராமன், கிருஷ்ணன் முதலிய மற்ற தேவதைகளின் பல மந்திரங்களும், அவைகளுக்கு நியாஸம், யந்திரம், பீடபூஜை ஆவரண பூஜை, பிரயோகங்களும், குரு சிஷ்யாக்னிகுண்டமாலாலக்ஷணம், மந்திரதோஷங்கள், அவை களுக்கு பரிஹார முறைகளும், மற்றும் பல விஷயங்களும், நன்கு கூறப்பட்டிருக்கின்றன.

॥ मन्त्रदेवताप्रकाशिका ॥

MANTRADEVATĀPRAKĀŚIKĀ

மந்திரதேவதா பிரகாசிகை

Supplemental No. 20. Burnell's No. 6702. Sheets—98. Same as in Ms. No. 6701.

Remarks—The Ms. is very old and good.

॥ महालक्ष्मीरत्नकोशः ॥

MAHĀLAKSMĪRATNAKOŚAH

மஹாலக்ஷ்மீரத்னகோசம்

Supplemental No. 21. Bundle No. 5. Burnell's No. 6703 Substance—Paper. Sheets—1-186+Index 5=191. Script-

Devanāgarī. No. of Granthas--5750+Index 75=5825. Complete—(1—105 Adhyāyās)

Author : उमामहेश्वरसंवादात्मकः ।

Beginning :

श्रीगुरुभ्यो नमः । श्रीगणेशाय नमः ॥

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
नानापुष्पलतांकीर्णे नानासिद्धसमन्विते ॥
मुनिसंघैस्समाकीर्णे योगिवृन्दैर्निषेविते ।
प्रणम्य विधिवद्देवमिदं वचनमब्रवीत् ॥

End :

राजाधिराजपरमेश्वरराजलक्ष्मी-
वर्म(र्मा)प्रकाश्यमिदमीश्वरि वर्मकार्यम् ।
कालेषु यः पठति मन्त्रमिदं वरिष्ठः
सिद्धिं श्रियं च स लभेदिह पूज्यमानः ॥

Colophon :

इति श्रीमहालक्ष्मीकल्पेत्यादि उमामहेश्वरसंवादे शङ्करेण विरचिते प्रत्यक्षसिद्धिप्रदे महालक्ष्मीरत्नकोशे पञ्चोत्तरशततमोऽध्यायः ॥ श्रीमहालक्ष्मीरत्नकोशपुस्तकं समाप्तम् ॥

Subject :

महालक्ष्मीमन्त्रः । लक्ष्मीषोडशाक्षरीमन्त्रः । महाशान्तिविधिः, तन्निमित्तानि । श्रीसूक्तजपविधिः, अभिषेकविधिश्च । वाग्देवीब्रह्ममन्त्रः । उमामहेश्वरमन्त्रः । भूवराहमन्त्रः । श्रीमन्त्रिपुरसुन्दरीमन्त्रः । सिद्धलक्ष्मीराज्यलक्ष्मीपद्मावतीजगद्योनिमन्त्राः । संकर्षणादिमूर्तिचतुष्टयमन्त्राः । वसुधारापद्मनिधिमन्त्रः । ऋद्धिगारुडमन्त्रः । शोषिण्यादिमन्त्राः । ऋद्ध्यादिमन्त्राः । प्रत्यंगिराऋचां प्रयोगाः । अणिमादिमन्त्राः । गुरुपादुकापूजा । देवीरश्मिमालामन्त्रः । गुर्वादिमन्त्राः । नवदूतीमन्त्रः । चतुष्षष्टिसिद्धनामानि । आनन्दभैरवमन्त्रः । वीरावळीमन्त्रः ।

सिद्धमन्त्रः । श्रीविद्यासंपुटविधानं तन्माहात्म्यं च । गायत्री-संपुटविधानं । देवीनवावरणदेवतामन्त्राः । त्रिपुरानवकमन्त्रः । क्रममालामन्त्रः । लक्ष्मीकवचम् । नवावरणलक्ष्मीकवचम् । महागणपतिभुवनेश्यन्नपूर्णाश्यामळावाराहीसरस्वतीरेणुकामन्त्राः । शरभसुदर्शनहनुमच्छास्तृमन्त्राः । अन्ये केचन मन्त्राश्च । प्रायेणैतेषां मन्त्राणां यन्त्राणि प्रयोगाश्च । सर्वदेवतागायत्री । भूभूतशुद्धिः । श्रीकण्ठादिमातृकान्यासाः । अग्निकुण्डजिह्वा-मालादिलक्षणानि । अन्ये च बहवो विशेषा विद्यन्ते ॥

Remarks—The Ms. is in good condition.

இந்நூல் பார்வதிக்கு பரமசிவன் உபதேசித்தது. இது சாக்தர்களுக்கு மிகவும் முக்கியமானது. இதில் சாக்த ஸம்பந்தமான ஸகல தேவதா மந்திரங்களும், யந்திரங்களும், பிரயோகங்களும் இருப்பதுடன், இதர நூல்களில் கிடைக்கக்கூடாத பலமந்திரங்களும், முக்கியமாக தேவீநவாவரண தேவதா மந்திரங்களும் மஹாலக்ஷ்மீமந்திரம் முதலிய அநேக தேவதா மந்திரங்களும் இருக்கின்றன. இது ஓர் சிறந்த நூல்.

---

६. सौभाग्यरत्नाकरः ॥

SOWBHĀGYARATNĀKARAH

ஸௌபாக்கியரத்நாகரம்

Supplemental No. 22. Bundle No. 6. Burnell's No. 6704.
Substance—Paper. Sheets—1-410. Script—Devanāgarī.
No. of Granthas—9000. Complete—(1-36 Tarangās.)
Author—Srī Vidyānandanātha.

Beginning:

श्रीगणेशाय नमः ॥ श्रीवाग्देव्यै नमः ॥

प्रारम्भे भरणे भङ्गे यन्मदस्यन्दिबिन्दवः ।
कारणानि प्रपञ्चस्य तं वन्दे वारणाननम् ॥

End :

त्यक्त्वा कुलं कुलवधूः पुरमध्यवीथ्या
गत्वाऽकुलं मधु निपीय यथेप्सितं या ।
मत्ता परं पुरुषमेत्य तदीयसङ्गा-
त्तुष्टा पुनस्स्वकुलमेति पुनातु सा माम् ॥
श्रीविद्यानन्दनाथेन शिवयोः प्रियसूनुना ।
कृते सौभाग्यरत्नाब्धौ षट्त्रिंशोऽगात्तरङ्गकः ॥

Colophon :

इति श्रीसच्चिदानन्दचरणारविन्दद्वन्द्वान्तेवासिना श्रीश्रीविद्यानन्द-नाथेन कृते सौभाग्यरत्नाकरे षट्त्रिंशस्तरङ्गः ॥ शुभमस्तु ॥

Subject :

शाक्तसर्वस्वभूतोऽयं ग्रन्थः । त्रिपुरसुन्दर्युपासकानां श्रीविद्याशाक्तानां आवश्यकास्सर्वेऽपि विषया ग्रन्थेऽस्मिन् प्रतिपाद्यन्ते । त्रिपुर-सुन्दरीमन्त्रः । त्रिपुरसुन्दरीसप्तावरणदेवतामन्त्राः साङ्गोपाङ्गाः । न्यासाः । नित्यनैमित्तिककाम्यपूजाविधयः । सौम्योग्रप्रयोगाः । सिद्धिक्रमाश्च वर्ण्यन्ते ॥

Remarks;—The Ms. is in good condition. The Ms. was purchased and brought by Śri Śerfoji Mahārāja from Benares.

இது ஸ்ரீவித்யோபாஸகர்களுக்கு மிக முக்கியமான நூல். இதில் சாக்த ஆன்ஹிகம், பஞ்சதசீ மந்திரம், உபாஸநாவிதிகள் ஸப்தாவரண தேவதா மந்திரங்கள், நித்யநைமித்திககாம்ய பூஜாவிதிகள், க்ரூர ஸௌம்ய பிரயோகங்கள், ஸித்திக் ரமங்கள் முதலிய பல விஷயங்களும் கன்கு கூறப்பட்டிருக் கின்றன.

॥ सौभाग्यरत्नाकरः ॥

SOWBHĀGYARATNĀKARAH

ஸௌபாக்கியரத்நாகரம்

Supplemental No. 23-24. Bundle No 7 Burn II's No. 6705

& 6706. Sheets—476 & 248. Same as in Ms. No. 6704.

Remarks:—Each Ms. is complete Ms. The 2 Mss. are in good condition. An Index is attached in Ms. No. 6706 which is newly prepared.

॥ साम्राज्यलक्ष्मीपीठिका ॥

SĀMRĀJYALAKṢMĪPĪṬHIKĀ

ஸாம்ராஜ்யலக்ஷ்மீபீடிகை

Supplemental No. 25. Bundle No. 8. Burnell's No. 6707.
Substance—Paper. Sheets—1-132 (+index 2=134).
Script—Devanāgarī. No. of Granthas—4600. Incomplete (1-135 paṭalas Complete. 136 paṭala is incomplete.)
Author— शिवपार्वतीसंवादात्मिका

Beginning :

कैलासशिखरे रम्ये रत्नमण्डपमध्यमे ।
दिव्यकल्पतरोर्मूले रत्नसिंहासने शुभे ॥ १ ॥

— — — — — — — — — — ॥

समस्तलोकजननी पार्वती प्राह धूर्जटिम् ॥

End :

प्रसीद देवि पद्माक्षि प्रसीद हरिवल्लभे ।
प्रसीद कमले देवि प्रसीद कमलालये ॥

Colophon :

इत्याकाशभैरवाख्ये महाशैवतन्त्रे साम्राज्यलक्ष्मीपीठिकायां अङ्गदेवताद्यावरणदेवतास्वरूपनिरूपणं नाम पञ्चात्रिंशदुत्तरशततमः पटलः ॥

Subject :

ग्रन्थेऽस्मिन्नसंपूर्णलक्ष्मीस्तुत्यन्ताः 136 पटलाः सन्ति । सर्वलोकक्षेमावहः अखण्डसाम्राज्यदायकः श्रीसाम्राज्यलक्ष्मीमन्त्रः सकल्पस्सप्रयोगरहस्यः साङ्गोपाङ्गः प्रतिपाद्यते । राजावासयोग्यप्रधानराजधानीपुरनिर्माणविधिः

वर्ज्यावर्ज्यदुर्गलक्षणानि वप्रप्राकारादिलक्षणानि धनुर्वेदः नगरादिरक्षाविधिः सिंहासननिर्माणविधिः दण्डयात्राकालः गजाश्वोत्पत्तिः चतुरङ्गबललक्षणं चापाद्यायुधलक्षणं व्यायामः युद्धस्वरूपं वीरगतिः देशक्षोभकरसर्वदोषशान्तिविधिः इत्यादिका बहवो विशेषाः प्रतिपाद्यन्ते ॥

Remarks:—The Ms. is in good condition.

இந்த நூல் பார்வதிதேவிக்கு பரமசிவனால் உபதேசிக்கப்பட்ட ஸ்ரீ ஆகாசபைரவதந்திரம் என்ற மாபெரும் நூலின் ஒருபாகம்.

இதில் அகண்ட ஸாம்ராஜ்யத்தைத்தரத்தக்க ஸ்ரீஸாம்ராஜ்ய லக்ஷ்மீ மந்திரம் அதன் ஸித்திக்கிரமங்கள் அதன் அங்கங்கள் தேவியின் ஸ்வரூபம் பூஜாவிதி பிரயோகங்கள் உத்பாதாதிகளுக்கு சாந்திகள் முதலியன கன்கு கூறப்பட்டிருக்கின்றன.

தவிர ராஜதானீ பட்டணம் இவைகளின் நிர்மாண முறைகள், துர்கங்களின் லக்ஷணங்கள், அகழ் கோட்டைகளின் லக்ஷணங்கள், தனுர்வேதம், நகராதிரக்ஷணம், ஸிம்மாஸந லக்ஷணம் வில் முதலிய ஆயுதங்களின் லக்ஷணம், தண்டயாத்திரை யானை குதிரைகளின் உத்பத்தி, நான்கு வகை ஸைன்யங்களின் லக்ஷணம், தேகாப்யாஸம், சண்டையின் தன்மை, வீரகதி, தேசத்திற்குத் தீங்கிழைக்கத்தக்க தைவிக தோஷாதிகளுக்கு பரிஹாரங்கள், முதலிய பல சிறந்த விஷயங்களும் கூறப்பட்டிருக்கின்றன.

॥ साम्राज्यलक्ष्मीपीठिका ॥

SĀMRĀJYALAKSMĪPĪTHIKĀ

ஸாம்ராஜ்யலக்ஷ்மீபீடிகை

Supplemental No. 26. Bundle No. 8. Burnell's No. 6708.
Sheets—1-77. Same as in Ms. No. 5707.

॥ साम्राज्यलक्ष्मीपीठिका ॥

SĀMRĀJYALAKSMĪPĪTHIKĀ

ஸாம்ராஜ்யலக்ஷ்மீபீடிகை

Supplemental No. 27. Bundle No. 8. Burnell's No. 6709.

Substance—Paper. Sheets—1—13. Script—Devanāgarī. No. of Granthas-210. Incomplete (21-32 Paṭalas). Author-शिवपार्वतीसंवादात्मिका ।

Beginning:

श्रीगणेशाय नमः । पार्वत्युवाच—

देवदेव विरूपाक्ष सर्वज्ञ शिव शंकर ।
विधानं तु महाशान्तेस्त्वन्मुखाम्भोजतः श्रुतम् ॥
इदानीं श्रोतुमिच्छामि दुर्गाणां लक्षणं परम् ।

End.

एवं ते राजगेहस्य निर्माणविधिरीरितः ।
संग्रहेण वरारोहे किमन्यच्छ्रोतुमिच्छसि ॥

Colophon:

इत्याकाशभैरवाख्ये महाशैवतन्त्रे साम्राज्यलक्ष्मीपीठिकायां अन्तःपुरनिर्माणस्वरूपकथनं नाम द्वात्रिंशः पटलः ॥ इतः परं गृहप्रतिष्ठादि ॥

Subject:

अष्टविधगिरिदुर्गस्वरूपकथनम् । वर्जनीयगिरिदुर्गाष्टकस्वरूपकथनम् । सप्तविधवनदुर्गस्वरूपकथनम् । अष्टविधसालनिर्माणस्वरूपकथनं । उपसालस्वरूपकथनं । सालद्वारस्वरूपकथनं । सालवप्रकर्तव्यगृहनिर्माणादिस्वरूपकथनं । वस्तुसंग्रहस्वरूपकथनं । पुरनिर्माणस्वरूपकथनं । राजास्थानमण्डपादिनिर्माणस्वरूपकथनं । नवरङ्गकूटादिनिर्माणस्वरूपकथनं । अन्तःपुरनिर्माणस्वरूपकथनं । इतीमे विषयाः क्रमशो द्वादशसु पटलेषु निरूप्यन्ते ॥

Remarks:—The Ms. is in good condition. This is a portion of the work in Supp. No. 25 & 26.

॥ धानुष्कश्रमविधिः ॥

DHĀNUSKAŚRAMAVIDHIH

தானுஷ்கசிராமவிதி

Supplemental No. 28. Bundle No. 8. Burnell's No. 6710.

Substance—Paper. Sheets—1-10. Script—Devanāgarī. No. of Granthas—140. Complete. Author.

पार्वतीपरमेश्वरसंवादात्मकः ।

Beginning:

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । पार्वती—

पदातिलक्षणं देव श्रुतं त्वन्मुखपङ्कजात् ।
इदानीं श्रोतुमिच्छामि चापाद्यायुधलक्षणम् ॥
शराणां चैव लक्ष्यस्य धानुष्कस्य विशेषतः ।

End:

इत्येवं ते समाख्यातं श्रमकर्म यथाक्रमम् ।
संग्रहेण सरोजाक्षि किमन्यच्छ्रोतुमिच्छसि ॥

Colophon:

इति श्रीमच्छैवतन्त्रे साम्राज्यलक्ष्मीपीठिकायां श्रमकर्मस्वरूप-निरूपणं नाम त्रयस्त्रिंशदुत्तरशततमः पटलः ॥ श्रीशिवार्पणमस्तु ॥

Subject:

चापशरधानुष्कलक्षणम् । धानुष्कश्रमस्वरूपं च (साम्राज्यलक्ष्मी-पीठिकायां 132&133 पटलौ)

Remarks.—The Ms. is in good condition.

॥ ऋश्यशृङ्गसंहिता ॥ (अनुत्तरब्रह्मतत्त्वरहस्यं)

RIŚYASRNGASAMHITĀ

ரிச்ய ச்ருங்கஸம்ஹிதை

Supplemental No, 29, Bundle No. 9. Burnell's No. 6711 a & 6711 b. Substance—Paper. Sheets—1-171 & 1-181. Script—Devanāgarī. No. of Granthas—6000 + 4700= 10700. Complete—(1st & 2nd parts.) Author.

महर्षिभ्यः ऋश्यशृङ्गेन प्रोक्ता ॥

Beginning;

श्रीगणेशाय नमः ॥ श्रीसाम्बशिवाय नमः ॥

वागीशाद्यास्सुमनसस्सर्वार्थीनामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ॥
श्रीजानकीशपादाब्जदृढभक्तं जितेन्द्रियम् ।
विभाण्डकसुतं शान्ताभर्तारं तपसां निधिम् ॥

End:

इदं तन्त्रं महद्गुप्तं तारकब्रह्मरूपिणा ।
जानकीपतिना प्रोक्तं जगदानन्दहेतुकम् ॥

Colophon:

इति श्रीमदनुत्तरब्रह्मतत्वरहस्ये दाशरथीये वेदार्थसंग्रहे उत्तरभागे सौभाग्योदये राजराजविद्यामाहात्म्ये शास्त्ररहस्यकथनं नाम पञ्चचत्वारिंशोऽध्यायः समाप्तः ॥ श्रीगोविन्दाय नमः ॥ रामचन्द्राय नमः ॥

Subject:

जगत्प्रणवव्याहृतिमातृकाष्टाक्षराद्युत्पत्तिः । अनुत्तरब्रह्मतत्वावतारः । पादुकामन्त्रः । वैष्णवरश्मिमालामन्त्रः । अजपामातृकामन्त्राः । षडक्षराष्टाक्षरादिविष्णुमन्त्राः । तथाविधा नानालक्ष्मीमन्त्राः । तेषां सिद्धिक्रमः । योगस्वरूपोपपादनं । ब्रह्मर्षित्वादिसाधनविधिः । वसुन्धरानीलादशावतारमूर्तिमन्त्राः । हयाननगरुडसुदर्शनहनूमन्मन्त्राः इत्यमी विषयाः प्रथमखण्डे प्रतिपाद्यन्ते । साम्राज्यलक्ष्म्यादिलक्ष्मीमन्त्रपञ्चकसाधनविधिः । विष्णुवर्मपञ्जरकवचानि । तेषां साधनविधिः । यन्त्राणि । पूजाविधिः । नानाक्षेत्राणां श्रीदेव्याः पीठरूपत्वकथनम् । इत्यादयो बहवो विशेषाः उत्तरखण्डे प्रतिपाद्यन्ते ॥

Remarks:—The Ms. is in good condition. The Ms. was purchased and brought by Sri Serfoji Mahârâja from Benares.

இந்நூல் ருஷ்யசிருங்க மஹரிஷியால் முனிவர்களுக்கு கூறப்பட்டது.

இதில் உலகம், பிரணவம், வியாஹிருதி மாதிருகாக்ஷரங்கள், விஷ்ணு அஷ்டாக்ஷரம், அநுத்தரப்ரஹ்மதத்வம், இவைகளின் உத்பத்தியும், பாதுகமந்திரம், விஷ்ணுரச்மிமாலா மந்திரம், அஜபாமாத்ருகா மந்திரங்கள், விஷ்ணு லக்ஷ்மீமந்திரங்களில் 6, 8, 12, 16, 32, 42, அக்ஷரங்களுள்ள பல மந்திரங்களும், விஷ்ணு தசாவதாரமூர்த்தி மந்திரங்களும் பூதேவி, நீலாதேவி, ஹயக்ரீவர், கருடன் ஸுதர்சனம், ஹநுமான் இவர்களின் மந்திரங்களும், இவைகளின் ஸித்தி முறைகளும், யோகஸ்வரூபமும், ப்ரஹ்மரிஷியாக ஆவதற்கு உபாயமும் முதல் பகுதியில் கூறப்பட்டிருக்கின்றன.

இரண்டாம் பகுதியில் ஸாம்ராஜ்ய லக்ஷ்மீ முதலிய ஐந்து லக்ஷ்மீமந்திரங்களும், தேவீரச்மிமாலையும், விஷ்ணுவர்ம பஞ்சரகவசங்களும் அவைகளின் ஸித்திக்கிரமங்களும் யந்திரங்களும் பூஜாவிதியும் கூறப்பட்டிருக்கின்றன.

॥ तन्त्रसारः ॥

TANTRASĀRAH

தந்திரஸாரம்

Supplemental No. 30. Bundle No. 9. Burnell's No 6713 Substance—Paper. Sheets—1-165, Script—Devanāgarī. No. of Granthas—8000 (10000.) Complete (2 Paṭalas.) Author—Mahāmahopādhyāya Kriṣṇānanda.

Beginning:

॥ श्रीगणेशाय नमः ॥ शङ्कराय नमः ॥

नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुरवन्दितम् ।
गुरुं च ज्ञानदातारं कृष्णानन्देन धीमता ॥

तत्तद्ग्रन्थगतान्वाक्यान्नानार्थं प्रतिपाद्य च ।
सौकर्यार्थं च संक्षेपात्तन्त्रसारः प्रतन्यते ॥

End :

उत्पातः स्वर्गलोके स्यात्पाताळे च धनक्षयः ।
मर्त्यलोके स्थिते वह्नावभीष्टफलदप्र(संप)दः ॥
इति अग्निस्थितिविधिः । शुभं भूयात् ॥ ग्रन्थसंख्या ८००० ॥

Colophon :

इति श्रीमहामहोपाध्याय श्रीकृष्णानन्दवागीशभट्टाचार्यविरचिते तन्त्रसारे द्वितीयः पटलः ॥

Subject :

पञ्चदेवताप्रधानमन्त्राः । तेषां पुरश्चरणं । पूजा । पुरश्चर्यायां देशकालेतिकर्तव्यतानियमाः । अग्निकुण्डमालादिविधिः । रक्षाविधिः । कवचं । स्तोत्राणि । पञ्चदेवतात्रिपुरावालादुर्गाछिन्नमस्तानित्यछिन्नातारादिगायत्र्यः । एतेषां मन्त्रयन्त्रस्तोत्रकवचप्रयोगाः । पञ्चदेवतापञ्चायतनक्रमः । तेषां प्रत्येकं संग्रहेण पूजाविधिः । त्रिपुरसुन्दरीमहापूजानैमित्तिकपूजाविधिः । तन्त्रग्रन्थसामान्यविषयाः । सर्वयज्ञापेक्षया जपयज्ञस्यैव निश्श्रेयससाधनत्वं । इत्यादयो विशेषाः प्रतिपाद्यन्ते ॥

Remarks:—The Ms. is in fairly good condition. The Ms. was purchased and brought by Sri Serfoji Mahārājā from Benares.

இந்நூல் கிருஷ்ணாநந்தரால் இயற்றப்பட்டது.

இதில், கணபதி, தேவி, ஸூரியன், பரமேசுவரன், விஷ்ணு ஆகிய ஐந்து தேவதைகளின் முக்கிய மந்திரங்களும் அவைகளின் ஸித்திமுறைகளும், பஞ்சாயதன பூஜையின் விதிகளும் பஞ்சதேவதைகள், திரிபுரை, பாலை, துர்கை, ச்சின்னமஸ்தை, நித்தியக்லின்னை, தாரை முதலிய தேவதைகளின் காயத்திரிகளும், திரிபுரஸுந்தரீ மஹாபூஜா விதியும், நைமித்திக பூஜா விதியும், ஜபயஞ்ஞம் ஒன்றே முக்தியைத்தாத்தக்கது என்பதும் இதுபோன்ற மற்றும் பலவிஷயங்களும் கூறப்பட்டிருக்கின்றன.

॥ अग्निकार्यविधिः [देवीदीक्षार्थकः] ॥

AGNIKĀRYA VIDHIH

அக்நி கார்யவிதி

Supplemental No. 31. Bundle No. 10. Burnell's No. 6713. Substance—Paper. Sheets—1—24. Script—Devanāgarī. No of Granthas—250. Complete.

Beginning :

श्रीगणेशाय नमः ॥ आचार्यः कुण्डस्य पश्चिमतः प्राङ्मुख उपविश्य गोमयोपलिप्ते भूप्रदेशे सिन्दूरादिना कृतवृत्तमण्डलान्तस्त्वासनमास्तीर्य ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्य तत्र प्राङ्मुख उपविश्य भूशुद्धिं भूतशुद्धिं च विधाय कुण्डं गोमयेनोपलिप्तं अष्टादशभिस्संस्कारैस्संस्कुर्यात् ॥

End :

अग्निर्मूर्धा दिवः ककुद् पतिः पृथिव्या अयं अपां रेतां ... ॥

Colophon:

Subject :

नवग्रहमण्डलविधिः । ग्रहाणां अभिमुखदिशः । साधिप्रत्यधिदैवतानां नवानां ग्रहाणां ऋचां प्रतीकमात्रं । ऋषिछन्दोदेवतोपेताः साधिप्रत्याधिदैवत सूर्यशुक्रचन्द्राङ्गारकऋचश्च ।

Remarks:—

स्थितिस्समीचीना ॥

॥ शिवपूजाविधिः ॥

SÍVAPŪJĀVIDHIH

சிவபூஜாவிதி

Supplemental No. 1107. Bundle No. 6. J. L No.32(अङ्कहीनम्) Substance—Paper. Sheets—5—11=7. Script—Devanāgari. No. of Granthas—60. Incomplete. Author—Nil.

Beginning :

असावादित्यो ब्रह्म । महावाक्यं ४ ब्रह्मैवाहमस्मि । आचम्य । गुरुभ्यो नमः स्वाहा ॥

End :

एवं कालनिर्णयेषु जपेत् । मन्त्र + ॥

Colophon : Nil.

Subject :

शिवपूजाविधिः । आदौ सन्ध्याविधिर्नष्टो भाति । अन्तिमपत्रे अन्तिमभागो नष्टः ॥

Remarks:—

मातृका प्राचीना । प्रतिपत्रं पत्रैकदेशो नष्टः ॥

॥ प्रासादपञ्चाक्षरीमन्त्रः ॥

PRĀSĀDAPAÑCĀKṢARĪMANTRAH

ப்ராஸாதபஞ்சாக்ஷரி மந்த்ரம்

Supplemental No. 1108. Bundle No. 6. J. L. No.33(अङ्कहीनम्) Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—17. Complete. Author—Nil.

Beginning :

अस्य श्रीप्रासादपञ्चाक्षरीमहामन्त्र ... ... वामदेव ऋषिः । पक्तिच्छन्दः । सांवशि + + ॥

End :

पुनर्न्यासं कृत्वा समापयेत् ॥ दिग्विमोकः ॥

Colophon : Nil.

Subject :

ऋष्याद्युपेतः शिवप्रासादपञ्चाक्षरमन्त्रः ॥

Remarks :—

पत्रद्वयेपि भागो नष्टः ॥ अथापि समीचीना मातृकायाः स्थितिः ॥

॥ महावाक्यचतुष्टयमन्त्रः ॥

MAHĀVĀKYACATUSTAYAMANTRAH

மஹாவாக்யசதுஷ்டய மந்த்ரம்

Supplemental No. 1109. Bundle No. 6. J. L. No. 34 (अङ्गहीनम्) Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—20. Complete. Author—Nil.

Beginning :

महादेवाय गुरवे नमः ॥

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।

बिन्दुनादकलातीतं तस्मै श्रीगुरवे नमः ॥

End :

स्फुरत्तारकसंकाशं विद्युत्कोटिसमप्रभम् ।

हृदिस्थं प्रणवं ध्यायेत् ओमिति ज्योतिरूपकम् ॥

Colophon : Nil.

Subject :

न्यासाद्युपेतः महावाक्यचतुष्टयमन्त्रः । प्रणवैकाक्षरन्यासादि-ध्यानान्तभागश्च ॥

Remarks:—

समीचीना स्थितिः ॥

॥ सौन्दर्यलहरी ॥

SOUNDARYALAHARĪ

ஸௌந்தர்யலஹரி

Supplemental No. 1110. Bundle No. 10. J. L. old No. 1465. Substance—Paper. Sheets—11. Script—Devanāgarī. No. of Granthas-200. Complete.

Author— श्रीमच्छङ्करभगवत्पादाः ।

Beginning :

श्रीगणेशाय नमः ॥ श्रीमत्त्रिपुरसुन्दर्यै नमः ॥

शिवश्शक्तया युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु भवति स्पन्दितुमपि ।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥ १ ॥

End :

निधे नित्यस्मेरे निरवधिगुणे नीतिनिपुणे
निराधारज्ञाने नियमपरचित्तैकनिलये ।
नियत्या निर्मुक्ते निखिलनियमान्तस्तुतियुते
निरातङ्के नित्ये निशमय मम त्वं स्तुतिमिमाम् ॥१००॥

Colophon :

इति श्रीमत्परम + + + + ॥

Subject :

सौन्दर्यलहरीनामकं देवीस्तुतिशतकम् ॥

Remarks:—

अतिप्राचीना मातृका झर्झरिता च । अन्तिमं पत्रं अत्यन्तं विशीर्णम् ।

॥ शारदाष्टकम् ॥

ŚĀRADĀSTAKAM

சாரதாஷ்டகம்

Supplemental No 1111. Bundle No. 10. J. L. old No. 2/466. Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—18. Complete.

Author— श्रीनिवासः ।

Beginning:

श्रीगणेशाय नमः । श्रीशारदायै नमः ॥

ये शासनं हरिमहेशादयस्तु विबुधेशा दिशंति जगतां
ते शाश्वतं पदनिवेशादिकं तव निदेशास्पदं विदधते ।
देशानवन्ति च नरेशास्त्वदक्षिरुचिलेशानुपेत्य धरणौ
हे शारदे जननि तेशावकोहमिति मे शामयस्व दुरितम् ॥

End:

निर्माय भिन्नगुणधर्मानहो विविधम(त्याशु)योजितवती
कर्मात्मिका विषयनर्मात्मिका निगममर्मात्मिका च स ॥
सच्छ्रीनिवासकृतमुच्छ्रीयमाणरसमीडे तवाष्टकमिदं
हे शारदे जननि ते शवकोयमिति मे शामयस्व दुरितम् ॥

Colophon:

इति शारदामत्तेभनाम प्रथमसंक्रमः ॥ श्रीशारदायै नमः ॥
इदं पुस्तकं तुक्कदेवपौत्ररघुभट्टपुत्रधीरभट्टेन लिखितम् ॥
श्रीशिवार्पणमस्तु ॥ श्रीशिव ॥ शुभमस्तु ॥

Subject:

शारदास्तुतिः ॥

Remarks:—

मातृकेयं झझेरिता विशीर्णा च ॥

॥ विष्णुसहस्रनामस्तोत्रम् ॥

VISNUSAHASRANĀMASTOTRAM

விஷ்ணுஸஹஸ்ராநாமஸ்தோத்ரம்

Supplemental No. 1112. Bundle No. 10 J. L. old No. 4/468. Substance—Paper. Sheets—5. Script—Devanāgarī. No. of Granthas—140. Complete.

Author— भारते शान्तिपर्वणि ।

Beginning:

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥
स्तोत्राणामुत्तमं स्तोत्रं विष्णोर्नामसहस्रकम् ।
हित्वा स्तोत्रसहस्राणि पठनीयं महामुने ॥

End:

शंखभृन्नन्दकी चक्री शार्ङ्गधन्वागदाधरः ।
रथाङ्गपाणिरक्षोभ्यस्सर्वप्रहरणायुधः ॥
सर्वप्रहरणायुधों नम इति ॥ ओं तत्सदिति ॥

Colophon: Nil.

Subject:

अवतारिकोपेतं विष्णुसहस्रनामस्तोत्रम । फलश्रुतिस्तु न विद्यते ॥

Remarks:—

निर्दुष्टा प्राक्तनी च मातृका ॥

॥ रेणुकासहस्रनामावलिः ॥

RENUKĀSAHASRANĀMĀVALIH

ரேணுகாஸஹஸ்ராநாமாவளி

Supplemental No. 1113. Bundle No. 10. J. L. old No. 6/470. Substance—Paper. Sheets—17. Script—Devanāgarī. No. of Granthas—135. Complete. Author—?

Beginning:

श्रीगणेशाय नमः ॥ श्रीमङ्गलमूर्तये नमः ॥ श्री ओं
श्रीरेणुकायै नमः ॥ ओं रामजनन्यै नमः ॥ जमदग्नि-
ग्नियायै नमः ॥

End:

सर्वकल्याणनिलया(यै नमः) ... ... ।
त्र्यम्बकस्तुता(यै नमः) ॥ १००० ॥

Colophon: Nil.

Subject:

रेणुकासहस्रनामावलिः ॥

Remarks :—

प्राचीनेयं मातृका । अस्याः पत्राणि निस्साराणि । अन्ते
चास्याः पत्रपञ्चकं प्रणष्टमध्यभागम् ॥

॥ सुमुखीसहस्रनामस्तोत्रम् ॥

SUMUKHĪSAHASRANĀMASTOTRAM

ஸுமுகீஸஹஸ்ரநாமஸ்தோத்ரம்

Supplemental No. 1114. Bundle No. 10. J. L. old No. 9/473 Substance—Paper. Sheets—13. Script—Devanāgarī. No. of Granthas—175. Complete.

Author— नन्द्यावर्ते उत्तरखण्डे ।

Beginning:

ओं स्वस्ति श्रीमहागणपतये नमः ॥ श्रीसद्गुरुभ्यो नमः ॥
श्रीसुमुखीदेव्यै नमः ॥ श्रीईश्वर उवाच—
शृणु देवि प्रवक्ष्यामि सांप्रतं त्वत्पुरः परम् ।
सहस्रनामपरमं सुमुख्या ... ... ये मनोः ॥

End:

वन्दे श्रीसुमुखीं प्रसन्नमनसां पूर्णेन्दुबिम्बाननां
सिन्दूराङ्कितमस्तकां मधुमदां लोलांसमुक्ताफलाम् ।

श्यामां कज्जलितां कराम्बुजगतां चाध्यापयन्तीं शुकं
गुञ्जापुञ्जविभूषणां सकरुणामामुक्तवेणीलताम् ॥

Colophon:

इति श्रीनन्द्यावर्ते उत्तरखण्डे श्रीसुमुखीसहस्रनाम संपूर्णमस्तु ॥
श्रीशुभं भवतु ॥

Subject:

न्यासाद्युपेतं फलश्रुत्युपेतं च सुमुखीसहस्रनामस्तोत्रम् ॥ श्यामलाया एव सुमुखीति नामेति भाति ॥

Remarks:—

प्राक्तनी गतसारपत्रात्मिका चेयं मातृका ॥

॥ उमामहेशाष्टोत्तरशतनामावलिः ॥

UMĀMAHEŚĀṢṬOTTARAŚATANĀMĀVALIḤ

உமாமஹேசாஷ்டோத்தரசதநாமாவளி

Supplemental No. 1115. Bundle No. 10. J. L. old No. 18/481. Substance—Paper. Sheets—6. Script—Devanâgarî. No. of Granthas—108. Complete. Author—?

Beginning:

ओं महाकैलासशिख[र]निलयाय नमो नमः ॥ १ ॥
रजताचलशृङ्गाग्रगृहस्थायै नमो नमः ॥ २ ॥

End:

पराशक्तिसमायुक्तपरेशाय नमो नमः ॥ ११४ ॥
महादेवसमायुक्तमहादेव्यै नमो नमः ॥ ११५ ॥

Colophon: Nil.

Subject:

पूर्वार्धे शिवनामयुक्ता उत्तरार्धे देवीनामयुक्ता च अष्टोत्तरशतनामावलिः । शिवनामावलि १०८ देवीनामानि १०८

आहत्य २१६ नामान्यत्र वर्तन्ते । 140 नामानन्तरं शिवनामैकं लेखकप्रमादपरिभ्रष्टमित्यतो नामैकं न्यूनम ॥

Remarks :—

समीचीना स्थितिः ॥

॥ विष्णुसहस्रनामभाष्यम् ॥

VISNUSAHASRANĀMABHĀSYAM

விஷ்ணுஸஹஸ்ரநாமபாஷ்யம்

Supplemental No 1116. Bundle No. 10. J. L. old No. 27/490 Substance—Paper. Sheets—44. Script—Devanāgarī. No of Granthas—2400. Incomplete.

Author— श्रीमच्छङ्करभगवत्पादाः ।

Beginning:

श्रीगणेशाय नमः ॥ श्रीरामाय नमः ॥

वैशंपायन उवाच—

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥

End :

ससुरासु(र)गन्धर्वाः सयक्षोरगराक्षसाः ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥
इन्द्रियाणि० ॥

Colophon : Nil.

Subject :

श्रीमद्भगवत्पादकृतं विष्णुसहस्रनामस्तोत्रभाष्यं फलश्रुतौ स्वल्पभागन्यूनम् ॥

Remarks :—

प्राचीनेयं मातृका नातिदुष्टा च ॥

॥ वायुस्तुतिः ॥

VĀYUSTUTIḤ

வாயுஸ்துதி

Supplemental No. 1117. Bundle No. 10. J. L. old No. 33/496 Substance—Paper. Sheets—7. Script—Telugu. No. of Granthas—300. Incomplete. Author—

Beginning :

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यान्नमः ॥

विघ्नो नोहास्तु विघ्नोघं भग्नभक्तध्वको हरिः ॥?

End :

हाङ्गि आविश्य । मोक्षलंनु नोडोंच्च वरानि निन्त कुत्तं ।

अञ्जनेत्रं पृथुतुंगवक्षसं ॥

Colophon : Nil.

Subject :

विषयस्सम्यङ्नावबुध्यते ॥

Remarks :—

समीचीना स्थितिः ।

॥ गणेशादिस्तोत्राणि ॥

GANEŚĀDISTOTRĀNI

கணேசாதிஸ்தோத்ரங்கள்

Supplemental No. 1118. Bundle No. 10 J. L. old No. 36/499. Substance—Paper. Sheets—21. Script—Devanāgarī. No of Granthas—420. Complete.

Author— व्यासादयः ।

Beginning:

गणेशाय नमः ॥ श्री ॥

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥

End:

श्रीमुष्टिवेङ्कटाद्रिं च सालिग्रामं च नैमिषम् ॥ ५ ॥
ततोद्रिं पुष्करं चैव नरनारायणाष्टकम् ॥

Colophon:

चिदं० अष्टकसमाप्तः ॥

Subject:

मङ्गलम् । विनायकस्तोत्रम् । गणेशाष्टकम् । सरस्वतीस्तोत्रम । सरस्वत्यष्टकम । उमामहेश्वरस्तोत्रम । शिवनमस्तेस्तोत्रम् । शिवशङ्कराष्टकम । मार्कण्डेयकृतमृत्युंजयस्तोत्रम । श्रीशङ्कर-भगवत्पादस्तोत्रम । गुरुपरंपरास्तोत्रम । [भारतीपीठे स्थितानां गुरूणां अनुक्रमणिका] । मठाम्नायस्तोत्रम् । प्रदोषस्तोत्रम । भजगोविन्दम् (श्रीभगवत्पादकृतम्) । विश्वनाथाष्टकम । चिदम्बरेशाष्टकम् । शिवापराधक्षमापणस्तोत्रम् । दक्षिणामूर्तिस्तोत्रम । हरिहरनामावलीस्तोत्रम । (श्रीभगवत्पादकृतम) । मुकुन्दाष्टकम । हर्यष्टकम (प्रह्लादकृतम) । मनोलयाष्टकम । निरञ्जनाष्टकम । [भगवत्पादकृतम] चिदानन्दाष्टकम । निर्वाणाष्टकम् । शिवमुखषट्कस्तोत्रम । अष्टताण्डवक्षेत्राणि । वेङ्कटेशाष्टकम् । चिदम्बरेशाष्टकम । विष्णुक्षेत्राष्टकम (असमाप्तम) च ॥

Remarks:—

प्रान्ते किञ्चिदिव नष्टपत्रभागापि नातिदुष्टा मातृकेयम् ॥

॥ ललितासहस्रनामावलिः ॥

LALITĀSAHASRANĀMĀVALIH

ലലിതാസഹസ്രനാമാവലി

Supplemental No. 1119. Bundle No. 10. J. L. old No. 37/500 Substance—Paper. Sheets—14. Script—Davanāgarī. No. of Granthas—255. Incomplete. Author—Nil.

Beginning :

श्रीगणपतये नमः ॥ श्रीगुरुभ्यो नमः ॥

अस्य श्रीललितासहस्रनामस्तोत्रमहामन्त्रस्य वशिनीवाग्देवता ऋषिः ।

End :

सव्यापसव्यमार्गस्थायै० सर्वापद्विनिवारिण्यै० स्वस्थायै० ९१६

Colophon : Nil.

Subject :

ललितासहस्रनामावलिः । षोडशाधिकनवशतनामान्ता ॥

९१७ नामारभ्य न विद्यत इति बोध्यम् ॥

Remarks:—

नातिसमीचीना स्थितिः ॥

॥ वेङ्कटेशनवरत्नमालिका ॥

VEṄKATEŚANAVARATNAMĀLIKĀ

வேங்கடேசநவரத்நமாலிகை

Supplemental No. 1120. Bundle No. 10. J. L. old No. 43/506.
Substance—Paper. Sheets—2. Script—Devanāgarī.
No. of Granthas—12. Incomplete. Author—Nil.

Beginning:

श्रीवेङ्कटेशाय नमः ॥

रत्नालङ्कृतमौलिमिन्दुवदनं कारुण्यपूर्णेक्षणं
कर्णालम्बितकुण्डलं करलसच्चक्राम्बुजं पद्मया ।
भास्वद्वक्षसमिन्द्रनीलसुरुचिं पीताम्बरालङ्कृतं
मञ्जीराञ्चितपादपद्मयुगळं श्रीवेङ्कटेशं भजे ॥ १ ॥

End:

कस्तूरीहिमवालुकं परिमलं गोरोचनं कुङ्कुमं
श्रीगन्धानुविलेपनं + + + + + + + ।

Colophon: Nil.

Subject:

वेङ्कटेशाष्टके 1—5 श्लोकाः समग्राः । षष्ठश्लोकस्य भागश्च ॥

Remarks :—

मातृकेयं प्राचीना । प्रान्तेषु पत्रभागो नष्टश्च ।

॥ शिवस्तोत्रम् ॥

SÍVASTOTRAM

சிவஸ்தோத்ரம்

Supplemental No. 1121. Bundle No. 10. J. L. old No. 44/507. Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—15. Complete.

Author— (स्कान्दे)बृहस्पतिकृतम् ।

Beginning:

श्रीगणेशाय नमः ॥ आङ्गीरस उवाच—
जयशंकर शान्त शशाङ्करुचे
रुचिरार्थद सर्वद सर्वशुचे ।
शुचिदत्तगृहीततमोपहृते
हृतभक्तजनोद्धततापतते ॥

End:

त्वत्प्रतिष्ठितलिङ्गस्य पूजां कृत्वा प्रयत्नतः ।
इमां स्तुतिमधीयानो मनोवाञ्छामवाप्स्यति ॥

Colophon :

इति श्रीस्कन्दपुराणे काशीखण्डे बृहस्पतिविरचितं वाग्भवाख्यं स्तोत्रं संपूर्णम् ।

Subject :

वाग्भवाख्यं बृहस्पतिकृतं शिवाष्टकस्तोत्रं फलश्रुत्युपेतम् ॥

Remarks:—

कीटजग्धे पत्रे ॥

॥ शिवस्तोत्रम् ॥

SIVASTOTRAM

சிவஸ்தோத்ரம்

Supplemental No. 1122. Bundle No. 10. J. L. old No. 45/508.
Substance– Paper. Sheets—3-5=3. Script—Devanāgari.
No. of Granthas—40. Incomplete.
Author— कालिकाखण्डे रावणकृतम् ।

Beginning:

.. .. र्तुभूतभर्तारि ॥ ४ ॥

अखर्वसर्वमङ्गळाकलानिधानमञ्जरी-
रसप्रवाहमाधुरीविजृम्भणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजासुरान्तकान्तकं तमन्तकान्तकं भजे ॥ ५ ॥

End:

विष्णोर्नुकं दीर्घतमा नारायणस्त्रिष्टुप् ॥ श्री ॥

Colophon:

इति श्रीकाळिकाखण्डे रावणकृतशिवस्तोत्रं संपूर्णम् ॥

Subject:

रावणकृतशिवस्तुतिः । रुद्रैकादशर्चां नवग्रहर्चां च ऋषि छन्दो-देवताश्च ॥

Remarks :—

समीचीना स्थितिः ॥

॥ ललितासहस्रनामस्तोत्रम् ॥

LALITĀSAHASRANĀMASTOTRAM

லலிதாஸஹஸ்ராநாமஸ்தோத்ரம்

Supplemental No. 1123, Bundle No. 10. J. L. old No. 50/513 Substance—Paper. Sheets—27. Script—Devanāgarī. No. of Granthas—184. Complete.
Author— हयग्रीवः ।

Beginnig:

श्रीगणेशाय नमः ॥ श्रीललिताम्बायै नमः ॥ लोकमावे नमः ॥
ओं श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।
चिदग्निकुण्डसम्भूता देवकार्यसमुद्यता ॥

End:

श्रीचक्रराजनिलया श्रीमत्त्रिपुरसुन्दरी ।
श्रीशिवा शिवशक्त्यैक्यरूपा श्रीललिताम्बिका ॥
पुनर्हृदयादिन्यासं ध्यानं च कुर्यात् ॥ श्रीपरदेवतार्पणमस्तु ॥

Colophon: Nil.

Subject :

उपोद्घातन्यासफलश्रुतिविहीनं ललितासहस्रनामस्तोत्रम् ॥

Remarks:—

मातृकायाः स्थितिस्समीचीना ॥

॥ शिवसहस्रनामावलिः ॥

ŚIVASAHASRANĀMĀVALIH

சிவஸஹஸ்ராநாமாவளி

Supplemental No. 1124. Bundle No. 10. J. L. old No. 51/514. Substance—Paper. Sheets—12. Script—Devanāgarī. No. of Granthas—150. Complete. Author—Nil.

Beginning:

श्रीसाम्बमूर्तये नमः ॥ ओं भवाय नमः ।
ओं शिवाय नमः । हराय नमः । रुद्राय नमः । पुष्कलाय०
बलाय० अग्रगण्याय० ॥

End:

रसाय नमः । रसज्ञाय नमः । सारज्ञाय नमः । सर्वसत्वाव-
लम्बनाय नमः । श्रीभवानीशङ्कराय नमः ॥ ११०० ॥

Colophon:

इति श्रीशिवसहस्रनामावळिः सम्पूर्णः ॥ श्रीसाम्बशिवार्पणमस्तु ।
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥
श्रीसाम्बमूर्तये नमः । श्रीपार्वतीवल्लभाय नमः ॥

Subject:

शिवसहस्रनामावलिः ॥

Remarks:—

प्राचीना नातिदुष्टा च मातृका ॥

॥ शिवकवचम् ॥

ŚIVAKAVACAM

சிவகவசம்

Supplemental No. 1125. Bundle No. 10. J. L. old No. 52/515 Substance—Paper. Sheets—9. Script—Devanāgarī. No. of Granthas—90. Complete.
Author— पाद्मे शिवप्रोक्तम् ।

Beginning:

श्रीगणेशाय नमः ॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

End:

स्तवानां स्तवराजं यत्तस्मात्त्वं जप सर्वदा ॥ १६ ॥

समस्तसिद्धिप्राप्तिश्च भविष्यति न संशयः ॥ १७ ॥

Colophon:

इति श्रीपद्मपुराणे श्रीमाधवीये शिवस्तोत्ररत्नाकरे शिवखण्डे सर्वतो रक्षणीयेन शिवेन प्रोक्तं शिवकवचं संपूर्णम् ॥

Subject:

शिवकवचम् ॥

Remarks:

प्राचीनेयं मातृका प्रान्तेषु नष्टपत्रभागाच ।

॥ वीरेश्वरस्तोत्रम् (पार्थिवलिङ्गपूजाविधिः) ॥

VĪRESVARASTOTRAM

வீரேச்வரஸ்தோத்ரம்

Supplemental No. 1126. Bundle No. 10. J. L old No. 53/516. Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—18. Incomplete. Author—Nil.

Beginning:

श्रीगणेशसरस्वतिसाम्बशिवेभ्यो नमः ॥

श्रीरेणुकादेव्यै नमः ॥ अथ पार्थिवलिङ्गपूजाविधानम् ॥

सरस्त्यास्तटे रम्ये शौनकाद्यास्तपोधनाः ।

सूतं परमया भक्तया पप्रच्छुरिदमादरात् ॥

End:

अ ... मप्यतरयच्च कनिष्ठं स्यात्ततः परम् ।

आनीया रणमध्याच्च मृदं शुद्ध + + + ॥

Colophon: Nil.

Subject:

पार्थिवलिङ्गपूजाविधिभागः ॥

Remarks:

जीर्णनष्टपत्रभागा मातृका ॥

॥ शिवरक्षास्तोत्रम् (शिवकवचम्) ॥

ŚIVARAKṢĀSTOTRAM

சிவரக்ஷாஸ்தோத்ரம்

Supplemental No. 1127. Bundle No. 10. J. L. old No 55/518 Substance—Paper. Sheets—2. Script—Devanagari. No. of Granthas—13. Complete.

Author— भविष्योत्तरे ।

Beginning:

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥

याज्ञवल्क्य उवाच—

चरितं देवदेवस्य महादेवस्य पावनम् ।
अपारं परमोदारं चतुर्वर्गैकसाधनम् ॥

End:

माता ईशो मत्पिता चन्द्रचूडः
स्वामी शम्भुः मत्सखा विश्वनाथः ।
सर्वस्वं मे चित्स(त्स्व)रूपी दयालुः
नान्यं जाने नैव जाने न जाने ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे शिवरक्षास्तोत्र(त्रं) सम्पूर्णम् ॥

Subject:

याज्ञवल्क्याय नारायणेन स्वप्ने उपदिष्टं अभयङ्करनामकं शिवरक्षाभिधानं शिवकवचम् ॥

Remarks:

प्राचीना जीर्णनष्टपत्रप्रान्ता मध्यभुग्ना चेयं मातृका ॥

॥ शिवध्यानपद्धतिः ॥

SĬVADYĀNAPADDHATIH

சிவத்யாநபத்ததி

Supplemental No. 1123. Bundle No. 19. J. L. old No. 62/525 Substance-- Paper. Sheets—5. Script—Devanāgari. No. of Granthas—150. Complete.

Author— अप्पय्यदीक्षिताः ।

Beginning:

श्रीसाम्बशिवाय नमः ।

मध्ये हृदयपाथोजं महादेवासनोचितम् ।

महिताकारशोभाढ्यं मण्टपं परिचिन्तयेत् ॥

End:

इत्याकलय्य शास्त्राणि शैवानि सकलान्यपि ।

उद्धृत्य तेभ्यस्सारांशः स्वग्रहीतो यथामति ॥ ४८ ॥

श्रीपतिध्येयपादाब्जः श्रीशिवध्यानपद्धतिः ।

Colophon:

इति श्रीमदप्पय्यदीक्षितस्य कृतिषु शिवध्यानपद्धतिः सम्पूर्णम् ।

Remarks:

नातिदुष्टा प्राक्तनी च मातृका ॥

॥ वेदसारशिवसहस्रनामस्तोत्रम् ॥

VEDASĀRASĬVASAHASRANĀMASTOTRAM

வேதஸார்சிவஸஹஸ்ராநாமஸ்தோத்ரம்

Supplemental No. 1129. Bundle No. 19. J. L. old No. 64/527

Substance—Paper. Sheets—14. Script—Devanāgarī. No. of Granthas—300. Complete.

Author— पाद्मे विष्णुप्रोक्तम् ।

Beginning:

श्रीशिवाय नमः ॥

एकदा मुनयस्सर्वे द्वारकां द्रष्टुमागताः ।

वासुदेवं च सोत्कण्ठं कृष्णदर्शनलालसाः ॥

End:

पिशाचसर्पनाशाय जप्तव्यमिदमुत्तमम् ।

नाम्नां सहस्रेणानेन समं किञ्चिन्न विद्यते ॥

Colophon:

इति श्रीपाद्मे पुराणे उत्तरभागे कृष्णमार्कण्डेयव्यासादिसंवादे वेदसारशिवसहस्रनामकथनं नाम एकोनविंशोध्यायः ॥

Subject:

रक्षार्थकशिवकवचपूर्वकं वेदसारशिवसहस्रनामस्तोत्रम् ॥

Remarks:

समीचीना स्थितिः ॥

॥ ललिताष्टोत्तरशतनामावलित्रयम् ॥

LALITĀSTOTTARAŚATANĀMĀVALITRAYAM

லலிதாஷ்டோத்தரசதநாமாவலி மூன்று

Supplemental No. 1130. Bundle No. 10. J.L. old No. 68/531. Substance—Paper. Sheets—15. Script—Devanāgarī. No. of Granthas—100. Incomplete. Author—

Beginning:

अस्य श्रीललिताम्बाष्टोत्तरशतनामस्तोत्रमालामन्त्रस्य ब्रह्मणे ऋषये नमः शिरसि ॥

End :

महत्यै० मानिन्यै० मन्दायै० महामायायै० महेश्वर्यै० महा-
देव्यै० महालक्ष्म्यै० त्रिपुरसुन्दर्यै० ॥

Colophon : Nil.

Subject :

ललिताष्टोत्तरशतनामावलिः । उमामहेशाङ्गपूजा । चिच्छक्त्य-
ष्टोत्तरशतनामावलिः । अन्यादेव्यष्टोत्तरशतनामावलिश्च ॥

Remarks :—

समीचीना स्थितिः ॥

॥ विष्णुसहस्रनामस्तोत्रभागः ॥

VISNUSAHASRANĀMASTOTRABHĀGAH

விஷ்ணுஸஹஸ்ராநாமஸ்தோத்ரபாகம்

Supplemental No. 1131. Bundle No. 10. J. L. old No. 73/536
Substance—Paper. Sheets—6. Script—Devanāgarī. No. of Granthas—45. Incomplete.
Author— महाभारते

Beginning :

श्रीवेदव्यासाय नमः ॥

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥

End :

चतुरात्मा चतुर्व्यूश्चतुर्दंष्ट्रश्चतुर्भुजः ।
भ्राजिष्णुर्भोजनं भोक्ता + ॥

Colophon : Nil.

Subject:

श्रीमहाभारतान्तर्गतविष्णुसहस्रनामभागः ॥

Remarks:—

समीचीना स्थितिः ॥

॥ ललितास्तवरत्नम् ॥

LALITASTAVARATNAM

லலிதாஸ்தவரத்னம்

Supplemental No. 1132. Bundle No. 10. J.L. old No. 75/538 Substance—Paper. Sheets—36. Script—Devanāgarī. No. of Granthas—300. Complete.

Author— दुर्वासमहर्षिः ।

Beginning :

श्रीगणेशाय नमः ॥

ओं वन्दे गजेन्द्रवदनं वामाङ्कारूढवल्लभाश्लिष्टम् ।
कुङ्कुमपरागशोणं कुवलयिनीजारकोरकापीडम् ॥ १ ॥

End :

ललितायास्तवरत्नं ललितपदाभिः प्रणीतमार्याभिः ।
अनुदिनमनुचिन्तयतां फलानि वक्तुं प्रगल्भयते सैव ॥२॥

Colophon : Nil.

Subject.

आर्याद्विशतीनामकम् ललितास्तवरत्नं

Remarks:—

समीचीना स्थितिः ॥

॥ नवग्रहकवचादयः ॥

NAVAGRAHAKAVACĀDAYAḤ

நவக்ரஹகவசம் முதலியன

Supplemental No. 1133. Bundle No. 10. J. L. old No. 77/540.

Substance—Paper. Sheets—16. Script—Devanāgarī. No. of Granthas—160. Incomplete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥

अस्य श्रीसूर्यकवचस्तोत्रमन्त्रस्य गौतमऋषिः । अनुष्टुप्छन्दः॥

सूर्यनारायणो देवता ॥

End :

शिरो मे भार्गवः पातु फालं पातु गृहाधिपः ।

नेत्रे दैत्यगुरुः पातु श्रोत्रे श्री + + + + + + ॥

Colophon :

इति श्रीब्रह्मोत्तरखण्डे ब्र(ऋ)ण्हर अङ्गारकस्तोत्रं संपूर्णम् ॥

(in sheet No. 9)

Subject:

आदित्यादिगुर्वन्तानां पञ्चानां ग्रहाणां कवचं स्तोत्रं च । शुक्रक-

वचभागश्च ॥

Remarks:—

अर्वाचीनानि पत्राणि सभीचीना च स्थितिः ।

॥ शिवताण्डवस्तोत्रम् ॥

ŚIVATHĀṆḌAVASTOTRAM

சிவதாண்டவஸ்தோத்ரம்

Supplemental No. 1134. Bundle No. 10. J. L. old No. 78/541

Substance—Paper. Sheets—3. Script—Devanāgarī. No. of Granthas—22. Complete.

Author— रावणकृतम्

Beginning :

श्रीगणेशाय नमः ॥

अथ रावणकृतशिवताण्डवस्तोत्रप्रारम्भः ॥

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरो
निलोलचीचिवल्लरीविराजमानमूर्धनि ।
धगद्धगध्वनिज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥

End :

पूजावसानसमये दशवक्त्रगीतं
यश्शम्भुपूजनपरं(रः) पठति प्रदोषे ।
तस्य स्थिरां मदगजेन्द्रतुरङ्गयुक्तां
लक्ष्मीं प्रसादसमये प्रददाति शम्भुः ॥

Colophon :

इति श्रीरावणविरचितं शिवताण्डवनृत्यस्तोत्रं सम्पूर्णम् ॥
श्रीरेणुकाम्बार्पणमस्तु ॥

Subject:

रावणकृतं श्रीशिवताण्डवस्तोत्रम् ॥

Remarks:—

समीचीना स्थितिः ॥

॥ सरस्वती दशश्लोकी ॥

SARASWATĪDAŚAŚLOKĪ

ஸரஸ்வதீதசச்லோகீ

Supplemental No. 1135. Bundle No. 10. J. L. old No. 81/544. Substance—Paper. Sheets—10. Script—Devanāgarī. No. of Granthas—60. Complete.

Author -- आश्वलायनपोक्ता ।

Beginning :

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ ऋषय ऊचुः

कथं सारस्वतप्राप्तिः केन ध्यानेन सुव्रता ।
माहासरस्वती येन तुष्टा भवतु तद्वदा ॥
आश्वलायन उवाच--

End :

नमस्ते शारदे देवी काश्मीरपुरवासिनी ।
त्वामहं प्रार्थये देवी विद्यादानं च देहि माम् ॥

Colophon :

इति सरस्वतीदशश्लोकीस्तोत्रं सम्पूर्णम् ॥

Subject :

आश्वलायनकृता सारस्वतदशश्लोकी ॥

Remarks:—

प्राक्तनी मातृका समीचीना स्थितिश्च ॥

॥ वेङ्कटेशसहस्रनामस्तोत्रम् ॥

VEṄKATEŚASAHASRANĀMASTOTRAM

வேங்கடேசஸஹஸ்ரநாமஸ்தோத்ரம்

Supplemental No. 1136. Bundle No. 10. J.L. old No. 86/549. Substance—Paper. Sheets—10. Script—Devanāgarī. No. of Granthas—120. Complete.
Author— ब्रह्माण्डे ।

Beginning :

श्रीगणेशाय नमः ॥
श्रीवेङ्कटेश्वरः स्वामी श्रीपतिर्जगदीश्वरः ।
भक्त ... ... ताभीष्टदायकः ॥

End :

इदं पठित्वा ... भक्त्या मासमेकं दिने दिने ।
कृपया वेङ्कटेशस्य कल्मषान्मोक्ष्यसे क्षणात् ॥

Colophon :

इति ब्रह्माण्ड० वेङ्क० सहस्र० सम्पूर्णम् ॥

Subject :

श्रीवेङ्कटेशसहस्रनामस्तोत्रम् ॥

Remarks:—

प्राचीनेयं मातृका । पत्राण्यस्याः झर्झरितानि कृमिदूषितानि नष्टाक्षरपत्रभागानि च ॥

॥ राघवेन्द्रस्तोत्रम् ॥

RĀGHAVENDRASTOTRAM

ராகவேந்த்ரஸ்தோத்ரம்.

Supplemental No. 1137. Bundle No. 10. J. L. old No. 88/551 Substance — Paper. Sheets —7. Script—Devanāgarī. No. of Granthas—70, Complete. Author-Nil.

Beginning :

श्रीगुरुभ्यो नमः ॥ श्रीराघवेन्द्रगुरवे नमः ॥

तप्तकाञ्चनसंकाशमक्षमालाकमण्डलुम् ।

दोर्भ्यां दधानं काशायवसनं राममानसम् ॥

End :

राघवेन्द्रगुरुं वन्दे तापत्रयनिवृत्तये ।

श्रीराघवेन्द्रगुरुराजार्पणमस्तु ॥ श्रीकृष्णार्पणमस्तु ॥

यतिहस्ते जलं दद्यात् (ततोन्नं च) पुनर्जलं ।

तदन्नं मेरुणा तुल्यं तज्जलं सागरोपमम् ॥

श्रीपाण्डुरङ्गार्पणमस्तु ॥ श्रीराम ॥

Colophon : Nil.

Subject :

श्रीराघवेन्द्राख्ययतीश्वरस्तुतिः ॥

Remarks:—

समीचीना स्थितिः ॥

॥ शिववेदसारसहस्रनामस्तोत्रम् ॥

ŚIVAVEDASĀRASAHASRANĀMASTORAM

சிவவேதஸாரஸஹஸ்ரநாமஸ்தோத்ரம்

Supplemental No. 1138. Bundle No. 10. J. L. old No. 90/553. Substance—Paper. Sheets—18. Script—Devanāgarī. No. of Granthas—300. Complete.

Author— (पाद्मे उत्तरखण्डे) विष्णुप्रोक्तम् ।

Beginning:

श्रीगणेशाय नमः ॥ श्री अखिलाण्डेश्वर्यै नमः ॥

श्रीवेदव्यास उवाच—

एकदा मुनयस्सर्वे द्वारकां द्रष्टुमागताः ।
वासुदेवं च सोत्कण्ठाः कृष्णदर्शनलालसाः ।

End:

पिशाचस्य विनाशाय जप्तव्यमिदमुत्तमम् ।
नाम्नां सहस्रेणानेन समं किञ्चिन्न विद्यते ॥ २६ ॥

Colophon:

इति श्रीपाद्मे पुराणे उत्तरखण्डे विश्वेश्वरमाहात्म्ये कृष्णमार्कण्डेय-व्यासादिसंवादे वेदसारसहस्रनाम नाम एकोननवतितमोऽध्यायः ॥

Subject:

पूर्वपीठिकाफलश्रुत्युपेतं वेदसारशिवसहस्रनामस्तोत्रम् ॥

Remarks:—

प्राचीना मातृका प्रान्तेषु कृमिजग्धपत्रभागा च ॥

शिवरक्षास्तोत्रम् ॥

ŚIVARAKSĀSTOTRAM

சிவரக்ஷாஸ்தோத்ரம்

Supplemental No. 1139. Bundle No. 10. J. L. old No. 91/554. Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—13. Complete.

Author— भविष्योत्तरे ।

Beginning :

श्रीगणेशाय नमः ॥

याज्ञवल्क्य उवाच--

चरितं देवदेवस्य महादेवस्य पावनम् ।
अपारं परमोदारं चतुर्वर्गैकसाधनम् ॥ १ ॥

End :

माता ईशो मत्पिता चन्द्रचूडः
स्वामिन् शम्भुर्मत्सखा विश्वनाथः ।
सर्वस्वं मे चित्स्वरूपो दयालु(:)
नान्यं जाने नैव जाने न जाने ॥

Colophon : Nil.

Subject :

शिवरक्षास्तोत्रनामकं लघुकवचम् ॥

Remarks:—

समीचीना स्थितिः ॥

॥ शिववेदपादस्तवः ॥

ŚIVAVEDAPĀDASTAVAḤ

சிவவேதபாதஸ்தவம்

Supplemental No. 1140. Bundle No. 10. J. L. old No. 93/556.

Substance—Paper. Sheets—28. Script—Devanāgarī. No. of Granthas—280. Complete.
Author— भविष्योत्तरे । जैमिनिकृतम् ॥

Beginning :

श्रीगणेशाय नमः ॥

मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरिवारणम् ॥

End :

अधीत्य विस्मृतो वेदान्वेदपादस्तवं पठन् ।
स चतुर्वेदसाहस्रपारायणफलं लभेत् ॥ १३० ॥

Colophon :

इति भविष्योत्तरपुराणे षट्संहितायां पुण्डरीकमाहात्म्ये जैमिनिकृते वेदपादस्तवो नाम द्वादशोध्यायः ॥ श्रीशिववेदपादस्तवं सम्पूर्णम् ॥ श्रीवडेरस्येदं पुस्तकम् ॥

Subject:

श्रीशिववेदपादस्तवः ॥

Remarks:—

स्थितिस्समीचीना ॥

॥ सकलजननीस्तवः ॥

SAKALAJANANĪSTAVAH

ஸகலஜநநீஸ்தவம்

Supplemental No. 1141. Bundle No. 10. J.L. oid No. 95/558. Substance —Paper. Sheets—5. Script—Devanāgarī. No. of Granthas—15. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

अजानन्तो यान्ति क्षयमवशमन्योन्यकलहैः
अमी मायाग्रन्थौ तव परिलुठन्तस्समाइ(यि)नः ।
जगन्मातर्जन्मज्वरभयतमःकौमुदी(दि) वयं
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीं(तीम्) ॥ १ ॥

End :

ब्रुवन्त्येते तत्वं भगवति समंन्ये विदुरस-
त्वरे मातः प्राहुस्तव सदसदभ्यस्य च सत् ।
परे नैतत्सर्वं समभिदधते देवि सुधियः
तदेतत्त्वन्मायाविलसितमशेषं ननु शिवे ॥ ७ ॥

Colophon : Nil.

Subject :

देवीस्तवः ।

Remarks:—

समीचीना स्थितिः ॥

॥ सौन्दर्यलहरीटीका ॥

SOUNDARYALAHARĪṬĪKĀ

ஸௌந்தர்யலஹரிடீகை

Supplemental No. 1142. Bundle No. 10. J.L. old No. 99/562.
Substance—Paper. Sheets—3+2=5. Script—Devanāgarī.
No. of Granthas—110. Incomplete.
Author— लक्ष्मीधरः ।

Beginning :

श्रीगणेशाय नमः ॥ देव्यै नमः ॥ शुभमस्तु ॥

वन्दे महीमहीयांसमंसलम्बिजटाधरम् ।
यत्क ... ... णात्काररवश्शब्दानुशासनम् ॥

End :

गतैरिति ॥ गतैः प्राप्तैर्माणिक्यत्वं रत्नभावं गगनमणिभिः द्वादशादित्यैः तेषामत्यन्तसन्निकृष्टसर्वार्थं भूषणगत-मणित्वं युज्यते । सान्द्रघटितं सान्द्रं नीरन्ध्रं यथा भवति तथा ॥

Colophon :

इति प्रथमोंशः ॥

Subject:

लक्ष्मीधरकृतसौन्दर्यलहरीटीकायां प्रथमांशमात्रम् ॥

Remarks :—

प्राचीना मातृका । पत्राण्यस्याः नष्टप्रान्तानि ॥

॥ श्यामलाकवचम् ॥

ŚYĀMALĀKAVACAM

ச்யாமளாகவசம்

Supplemental No. 1143. Bundle No. 10. J. L. old No.104/567. Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—32. Complete.

Beginning :

श्यामलायै नमः ॥

... ... ।

... ... मातङ्गीकवचं परम् ॥

गोपनीयं प्रयत्नेन ... ... समाचरेत् ।

End :

दद्याद्गुरुस्सुशिष्याय गुरुभक्तिरताय च ।

शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ॥

Colophon :

इति श्यामलाकवचं सम्पूर्णम् ॥

Subject :

श्यामलाकवचम् ॥

Remarks:—

मषीनाशात् प्रणष्टाक्षराग्रिमपुटा मातृका ॥

॥ शिवनामावलिः ॥

ŚIVANĀMĀVALIH

சிவநாமாவளி

Supplemental No. 1144. Bundle No. 10. J. L. old No. 108/571. Substance—Paper. Sheets—10. Script—Devanāgarī. No. of Granthas—300. Incomplete. Author—Nil.

Beginning :

(ई)शाय नमः ॥ ओं भवाय नमः । ओं शिवाय नमः । ओं हराय नमः । रुद्राय नमः । पुष्कलाय० । अयुग्मलोचनाय नमः । अग्रगण्याय० । सदाचाराय० ॥

End :

अरोगाय । तपनाध्यक्षाय । विश्वामित्राय । द्विजेश्वराय ॥

Colophon : Nil.

Subject :

असंपूर्णा शिवसहस्रनामावलिः ।

Remarks:—

संकुचितनष्टपत्रप्रान्तभागा प्राक्तनी मातृका ॥

॥ सोमसुन्दरेश्वरस्तोत्रम् ॥

SOMASUNDAREŚVARASTOTRAM

ஸோமஸுந்தரேச்வரஸ்தோத்ரம்

Supplemental No 1145. Bundle No. 10. J. L. old No. 109/572

Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas —10. Complete. Author—Nil.

Beginning :

श्रीसोमसुन्दरेश्वरस्तोत्रप्रारम्भः ॥

एकं ब्रह्माद्वितीयं च परिपूर्णं परात्परम् ।
इति यो गीयते वेदैः तं वन्दे सोमसुन्दरम् ॥ १ ॥

End :

यस्य दर्शनमात्रेण ब्रह्महत्यादिपातकम् ।
अवशं नश्यति क्षिप्रं तं० ... ... ॥

Colophon : Nil.

Subject :

सोमसुन्दरेश्वरस्तुतिदशकम् ॥

Remarks:—

समीचीना स्थितिः । अस्याः पत्रप्रान्तानि वर्णचित्रितानि ॥

॥ काशीस्तोत्रम् ॥

KĀŚĪSTOTRAM

காசீஸ்தோத்ரம்

Supplemental No. 1146. Bundle No. 10. J. L. old No. 112/575 Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—15. Complete. Author—Nil.

Beginning :

श्री अम्बिकासुताय नमः ॥

यत्र देहपतनेन देहिनां
मुक्तिरेव भवतीति निश्चितम् ।
पूर्वपुण्यनिचयेन लभ्यते
विश्वनाथनगरी गरीयसी ॥

End:

विश्वनाथनगरीस्तवन्तु वै
यः पठेत्प्रयतमानसनित्यम् ।
पुत्रदारधनलाभमव्ययं
मुक्तिमार्गगमने लभेत्सुखम् ॥ ९ ॥

Colophon :

इति विश्वनाथनगरीस्तोत्रम् ॥ विकृतिमाघशुद्धदशमी आदित्यवासरे मध्याह्नसमये ब्रह्मपुरीश्वरेश्वरसन्निधाने वृकोपनाम्ना महादेवेन लिखितम् ॥ तस्येदं ज्ञेयम् ॥ पत्रसंख्या २ ग्रन्थ १५॥

Subject:

काशीमहिमानुवर्णनात्मकं स्तोत्रम् ॥

Remarks:—

समीचीना स्थितिः ॥

॥ शनैश्चरस्तोत्रभागः ॥

ŚANAIŚCARASTOTRABHĀGAH

சனைச்சரஸ்தோத்ரபாகம்

Supplemental No. 1147. Bundle No. 10. J.L. old No. 114/577 Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—12. Incomplete. Author— Nil.

Beginning :

.. .. दुर्भिक्षं भविष्यति सुदारुणम् ॥ ५ ॥
देशाश्च नगरग्रामा भयभीताः समन्ततः ।

End :

वरं ब्रूहि प्रदास्यामि स्वेच्छया रघुनन्दन ॥ १६ ॥ अघ + ॥

Colophon : Nil.

Subject :

आद्यन्तहीनं शनैश्चरस्तोत्रम् ॥

Remarks:—

समीचीना स्थितिः ॥

॥ राजानतेस्तोत्रम् ॥

RĀJĀNATESTOTRAM

ராஜாநதேஸ்தோத்ரம்

Supplemental No. 1148. Bundle No. 10.J. L. old No. 115/578 Substance—Paper. Sheets—4. Script—Devanāgarī. No. of Granthas—90. Complete. Author—Nil.

Beginning :

यैः स्वल्पोपि न दीयते द्विजनुषे राजानतेजानते
कस्मैचित्त्वमितः स सन्ततमसद्राजानतेजानते ।
किन्तैः स्वान्तपदाम्बुजे दिविषदां राजानतेजानते
कीनाशोद्धतिहृत्यळेन जगतां राजानतेजानते ॥

End :

यो नैवाहितलक्षणः किममुना राजानतेजानते
सूनुं सैष नृपस्तु हे हृदयताराजानतेजानते ।
यस्मै श्रीःस्पृहयेत योग्रिमजनूराजानतेजानते
सेव्यं सोपि भवे भवव्रतमिदं राजानतेजानते ॥

Colophon : Nil.

Subject :

शिवस्तुतिपञ्चकं सव्याख्यम् ॥

Remarks:—

समीचीना स्थितिः ॥

॥ विष्णुसहस्रनामावलिः ॥

VISNUSAHASRANĀMĀVALIH

விஷ்ணுஸஹஸ்ரநாமாவளி

Supplemental No. 1149. Bundle No. 10. J. L. old No. 116/579

Substance—Paper. Sheets—59. Script—Devanāgarī. No. of Granthas—200. Incomplete.

Author— भारते ।

Beginning:

श्रीरामचन्द्राय नमः ॥

मूकं करोति बाचालं पङ्गुं लङ्घयते गिरीन् ।

यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥

हरिः ओं ॥ विश्वस्मै नमः ॥ विष्णवे नमः ॥ वषट्काराय नमः ॥

End :

सर्वप्रहरणायुधाय नमः ॥ सर्वप्रहरणायुधोन्नम इति ॥

नमोस्त्वनन्ताय सहस्रमूर्तये + युगधारिणे नमः ॥

श्रीरामार्पण० ॥

Colophon : Nil.

Subject :

विष्णुसहस्रनामावलिः ॥

Remarks:—

नातिसमीचीना स्थितिः ॥

॥ शिवसहस्रनामस्तोत्रम् ॥

ŚIVASAHASRANĀMASTOTRAM

சிவஸஹஸ்ரநாமஸ்தோத்ரம்

Supplemental No. 1150. Bundle No. 10. J. L. old No. 119/582 Substance—Paper. Sheets—1—9 & 14—18=14. Script—Devanāgarī. No. of Granthas—155. Incomplete.

Author— स्कन्दाय शिवोपदिष्टम् ।

Beginning :

श्रीगुरुभ्यो नमः ॥

सञ्जय उवाच–

पुरा कैलासशिखरे शङ्करं लोकशङ्करम् ।

प्रणतः परिपप्रच्छ पुरुषार्थस्य साधकम् ॥

स्कन्दः–

End :

नृत्यप्रियो नाटककृत् नूपुराभरणप्रियः ॥

नामितारिर्नारकारी + ॥

Colopho: Nil.

Subject :

शिवसहस्रनामस्तोत्रभागः ॥

Remarks :—

प्राचीना मातृका । समीचीना च स्थितिः ॥

॥ सुब्रह्मण्यसहस्रनामस्तोत्रम् ॥

SUBRAHMANYASAHASRANĀMASTOTRAM

ஸுப்ரஹ்மண்யஸஹஸ்ரநாமஸ்தோத்ரம்

Supplemental No. 1151, Bundle No. 10, J.L. old No.122/585 Substance—Paper. Sheets—12. Script—Devanāgarī. No. of Granthas—140. Incomplete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥

सूतः—

तुष्टुवुस्सुरसङ्घास्ते स्कन्दं सेनापतिं तदा ।

नामभिस्तत्र मुदिताः सहस्राष्टशतैर्मुदा ॥ १ ॥

End

रञ्जनो रणगो रुष्टो रमणो रात्रिवर्धनः ।

विर + ॥

Colophon : Nil.

Subject :

असंपूर्ण सुब्रह्मण्यसहस्रनामस्तोत्रम् ॥

Remarks:—

समीचीना स्थितिः ॥

॥ विष्णुसहस्रनामस्तोत्रम् ॥

VISṆUSAHASRANĀMASTOTRAM

விஷ்ணுஸஹஸ்ராநாமஸ்தோத்ரம்

Supplemental No. 1152. Bundle No. 10. J. L. old No. 125/588 Substance—Paper. Sheets—4. Script—Devanāgarī. No. of Granthas—175. Complete.

Author— भारते शान्तिपर्वणि ।

Beginning :

श्रीलक्ष्मीनारायणाय नमः ॥

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥

End :

नरो मुक्तिमवाप्नोति चक्रपाणेर्वचो यथा ।
ब्रह्महत्यादिकं पापं सर्वं पापं विनश्यति ॥

Colophon :

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शान्तिपर्वणि श्रीविष्णोर्नामसहस्रस्तोत्रम् ॥

Subject:

विष्णुसहस्रनामस्तोत्रम ॥

Remarks :—

चतुर्थी संवलितेयं मातृका चतुर्थी प्रभग्ना नष्टाक्षरा च ॥

॥ लक्ष्मीसहस्रनामस्तोत्रम् ॥

LAKṢMĪSAHASRANĀMASTOTRAM

லக்ஷ்மீஸஹஸ்ரநாமஸ்தோத்ரம்

Supplemental No. 1153. Bundle No. 10. J L. old No. 126/589 Substance—Paper. Sheets—22. Script—Devanāgarī. No. of Granthas—190. Incomplete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥

अस्य श्रीमहालक्ष्मीनामाष्टकसहस्रस्य ब्रह्मविष्णुमहेश्वर (रा)

ऋषयः । अनुष्टुप्छन्दः श्रीमहालक्ष्मीर्देवता ॥

End :

पठतां शृण्वतां स्तोत्रं वरमेकं प्रयच्छसि ।

दुष्टविद्राविणी देवी दुष्टदारिद्र्यभज(ञ्ज)नी ॥ १८३ ॥

Colophon: Nil.

Subject :

न्यासाद्युपेतं फलश्रुतिहीनं च सम्पूर्णं लक्ष्मीसहस्रनामस्त्रोत्रम् ॥

Remarks:—

नातिदुष्टा मातृका ॥

॥ शिवपूजाविधिः ॥

ŚIVAPŪJĀVIDHIH

சிவபூஜாவிதி

Supplemental No. 1154. Bundle No. 10. J. L. No 1(अङ्कहीनम्) Substance—Paper. Sheets—1—3 & 5=4. Script—Devanāgarī. No. of Granthas—34. Incomplete.

Author— शिवरहस्ये ।

Beginning :

काश्यप उवाच—

कृतनित्यक्रियः प्रातः समभ्युक्ष्याथ वारिणा ।

नदीतीरे शिवागारे बिल्वमूलेऽपि वा द्विज ॥

End:

स्तुत्वैवं शिवमिष्टदानकरुणापाङ्गञ्च लिङ्गस्थितं
सम्पूज्य प्रणताधिनाथमगजाकान्तं स मुक्तिं लभेत् ।
कामानप्यमितानवाप्य स मुदा भुक्त्वा सुखं शाङ्करः
पुण्यैश्चापि प्रदोषपर्वणि तथा पापैर्विमुक्तो भवेत् ॥

Colophon:

इति श्रीशिवरहस्ये अष्टमांशे एकोनविंशोध्यायः ॥

Subject :

काश्यपोपदिष्टः संक्षिप्तः शिवपूजाविधिः ॥

Remarks:—

समीचीना स्थितिः ॥

॥ शिवानन्दलहरीभागः ॥

ŚIVĀNANDALAHARĪBHĀGAH

சிவாநந்தலஹரிபாகம்

Supplemental No. 1155. Bundle No. 10. J. L. No. 2 Substance—Paper. Sheets—1, 2, 5, & 6=4. Script—Devanāgarī.; No.of Granthas—14. Incomplete.

Author— भगवत्पादाः ।

Beginning:

श्रीगणेशाय नमः ॥

कलाभ्यां चूडालङ्कृतशशिकलाभ्यां निजतपः-
फलाभ्यां भक्तेषु प्रकटितफलाभ्यां भवतु मे ।
शिवाभ्यामस्तोकत्रिभुवनशिवाभ्यां हृदि पुन-
र्भवाभ्यामानन्दस्फुरदनुभवाभ्यां नतिरियम् ॥ १ ॥

End:

प्रभुरस्त्वं दीनां(दीनानां) खलु परमबन्धुः पशुपते
प्रमुख्योऽहन्तेषामपि किमुत बन्धुत्वमनयोः ।
त्वयैव क्षन्तव्याः शि + ॥

Colophon: Nil.

Subject:

शिवानन्दलहरीभागः ॥

Remarks:—

अग्रिमपत्रे केवलं कियानिव भागो नष्टः ॥

॥ सदाशिवाष्टकम् ॥

SADĀŚIVĀṢṬAKAM

ஸதாசிவாஷ்டகம்

Supplemental No. 1156. Bundle No. 10. J. L. No. 3. Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas-20. Complete.

Author— भगवत्पादाः ।

Beginning:

श्रीगणाधिपाय नमः ॥

सुवर्णपद्मिनीतटान्तदिव्यहर्म्यवासिने
सुपर्णवाहनप्रियाय सूर्यकोटितेजसे ।
अपर्णया विहारिणे फणाधरेन्द्रधारिणे
सदा नमश्शिवाय ते सदाशिवाय शम्भवे ॥ १ ॥

End:

सदाशिवाष्टकमिदं यः पठेत्प्रयतो नरः ।
भुक्त्वा तु सकलान्भोगानन्ते शिवपदं व्रजेत् ॥ ९ ॥

Colophon:

इति श्रीमच्छङ्कराचार्यकृतं सदाशिवाष्टकं समाप्तिमगमत् ॥ शालीवाहनशके १७५२ विकृतिसंवत् माघे कृष्णपक्षे द्वितीयायां शनौ तञ्जपुर्यां इदं पुस्तकं वृकोपनाम्नो महादेवेन लिखितम् ॥ शिवार्पणम् ॥

Subject:

सदाशिवाष्टकस्तोत्रम् ॥

Remarks:—

पत्रप्रान्ते भागो नष्टः ॥

॥ सुब्रह्मण्योपनिषत् ॥

SUBRAHMANYOPANISAD

ஸுப்ரஹ்மண்யோபநிஷத்து

Supplemental No. 1157. Bundle No. 10. J. L. No. 4. Substance—Paper. Sheets—2. Script—Devanāgari. No. of Granthas—22. Complete.

Author— उपनिषत् ।

Beginning:

शन्नो + तिः ॥

अच्युतोस्मि महादेव भवकारुण्यदेशतः ।
विज्ञानघन एवास्मि शिवोस्मि किमतः परम् ॥

End:

पाशबद्धस्तदा जीवः पाशमुक्तस्सदाशिवः ।
शिवाय विष्णु० शिवस्य हृदयं० शिवः ॥ ओं शान्तिः ॥

Colophon:

सुब्रह्मण्योपनिषत् ॥

Subject:

कस्याप्युपनिषदो भागः ॥ नेयं सुब्रह्मण्योपनिषत् भवितुमर्हति ॥ सत्यचतुस्त्रिंशकञ्च ॥

Remarks:—

नातिदुष्टा स्थितिः ॥

॥ शिवपञ्चाक्षरस्तोत्रम् ॥

ŚIVAPAÑCĀKṢARASTOTRAM

சிவபஞ்சாக்ஷரஸ்தோத்ரம்

Supplemental No. 1158. Bundle No. 10. J. L. No. 5.

Substance—Paper. Sheet—1. Script—Devanāgari. No: of Granthas—7. Complete.

Author— भगवत्पादाः ।

Beginning :

श्रीनृसिंहाय नमः ॥

नागेन्द्रहाराय विलोचनाय
भस्माङ्गरागाय महेश्वराय ।
दिव्याय देवादिदिगम्बराय
तस्मै नकाराय नमः शिवाय ॥ १ ॥

End :

यज्ञस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय ।
ज्ञानाय नित्यं शिवमस्तु ... तस्मै यकाराय नमः शिवाय ॥

Colophon :

इति श्रीशङ्कराचार्यविरचितशिवपञ्चाक्षरीस्तोत्रं सम्पूर्णम् ॥

Subject :

शिवपञ्चाक्षरस्तुतिः ॥

Remarks:—

नातिसमीचीना स्थितिः ॥

॥ शिवाष्टकम् ॥

ŚIVĀṢṬAKAM

சிவாஷ்டகம்

Supplemental No. 1159. Bundle No. 10. J. L. No. 6. Substance—Paper. Sheets—2. Script—Devanāgari. No. of Granthas—13. Complete.

Author— श्रीभगवत्पादाः ।

Beginning :

श्रीशिव ॥

तस्मै नमः परमकारणकारणाय
दीप्तोज्वलज्ज्वलितपिङ्गललोचनाय ।

नागेन्द्रहारकृतकुण्डलभूषणाय

ब्रह्मेन्द्रविष्णुवरदाय नमः शिवाय ॥

End :

शिवाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ।

शिवलोकमवाप्नोति शिवेन सह मोदते ॥

Colophon :

इति श्रीशङ्कराचार्यविरचितं शिवाष्टकं संपूर्णमगमत् ॥

Subject :

भगवत्पादविरचितं शिवाष्टकस्तोत्रम् ॥

Remarks:—

समीचीना स्थितिः ॥

॥ लिङ्गाष्टकम् ॥

LIṄGĀṢṬAKAM

லிங்காஷ்டகம்

Supplemental No. 1160. Bundle No. 10. J. L. No. 7. Substance—Paper. Sheet—1. Script—Devanāgarī. No. of Granthas—12. Complete.

Author— भगवत्पादाः ।

Beginning :

श्रीगणपतयेहं नमामि ॥

ब्रह्ममुरारिसुरार्चितलिङ्गं निर्मलभासितशोभितलिङ्गम् ।

जन्मविदुरख(विदूर)विनाशितलिङ्गं तं प्रणतोस्मि सदाशिवलिङ्गम् ॥

End :

यक्षसुरासुरवन्दितलिङ्गं कुक्षजगत्त्रयकारणलिङ्गम् ।

दक्षकयज्ञविनाशनलिङ्गं तं प्रणतोस्मि सदाशिवलिङ्गम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यविरचितं लिङ्गाष्टकं सम्पूर्णम् ॥

Subject :

लिङ्गाष्टकस्तोत्रम् ॥

Remarks :—

समीचीना स्थितिः ॥

॥ शिवस्तोत्रम् ॥

SIVASTOTRAM

சிவஸ்தோத்ரம்

Supplemental No. 1161. Bundle No. 10. J. L. No. 8. Substance—Paper. Sheets—3. Script—Devanāgarī. No. of Granthas—16. Complete.
Author— सूतसंहितायाम् ।

Beginning:

श्रीशिवाय नमः ॥

देवा ऊचुः--
नीलकण्ठं विरूपाक्षं तुष्टुवुश्च सुरादयः ।
नमस्ते रुद्रमन्यव उतोत इषवे नमः ॥

End:

एवं सुरासुरैरन्यैः शंकरोमिष्टुतः पुनः ।
कृत्वा प्रसादं सर्वेषां तत्रैवान्तर्हितोभवत् ॥

Colophon :

इति सूतसंहितान्तील देवकृत शिवस्तोत्र समाप्त ॥

Subject :

श्रीरुद्रान्तर्गतवाक्यघटितं शिवस्तोत्रम् ॥

Remarks:—

समीचीना स्थितिः ॥

॥ लक्ष्मीद्वादशनामस्तोत्रम् ॥

LAKṢMĪDVĀDAŚANĀMASTOTRAM

லக்ஷ்மீத்வாதசநாமஸ்தோத்ரம்

Supplemental No. 1162. Bundle No. 10. J. L No. 9. Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—10. Complete.

Beginning:

श्रीगणेशाय नमः ॥ लक्ष्मीहृदयं ॥ धर्मपुत्रस्य श्रीकृष्ण उवाच—

धर्गमेतद्रमामन्त्रं गोविन्दस्समुपादिशत् ।
श्रीरेव प्रथमं नाम द्वितीयममृतोद्भवा ॥

End:

इत्येतद्वीष्पतिप्रोक्तं लक्ष्मीहृदयमुत्तमम् ।

Colophon:

इति लक्ष्मीद्वादशनामस्तोत्रं संपूर्णम् ॥

Subject:

लक्ष्मीहृदयनामकं लक्ष्मीद्वादशनामस्तोत्रम् ॥

Remarks:—

मषीनाशात् दुर्ज्ञेयान्यक्षराणि ॥

॥ विष्णुसहस्रनामव्याख्या ॥

VIṢṆUSAHASRANĀMAVYĀKHYĀ

விஷ்ணுஸஹஸ்ரநாமவியாக்யை

Supplemental No. 1163. Bundle No. 10. J. L. No. 10. Substance—Paper. Sheets—14. Script—Devanāgarī. No. of Granthas—300. Incomplete. Author—Nil.

Beginning:

श्रीगणेशाय नमः ॥ श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥

ओं ॥ ज्ञानानन्दघनानन्दतनवेऽनन्तशक्तये ।
नमोऽनन्ताभिधानाय रमानाथाय विष्णवे ॥

End :

अमेय आत्मदेहो यस्येति वा परोमात्रया त + ॥

Colophon : Nil.

Subject:

विष्णुसहस्रनामसु प्रथमशतकव्याख्या संपूर्णा । द्वितीयशतके द्वितीयस्य अमेयात्मेत्यस्य नाम्नो व्याख्या तु असमाप्ता ॥ मध्वाचार्यसंप्रदायानुसारिणा प्रणीता ।

Remarks :—

समीचीना स्थितिः ।

॥ वेदसारशिवसहस्रनामव्याख्या ॥

VEDASĀRAŚIVASAHASRANĀMAVYĀKHYĀ

வேதஸாரசிவஸஹஸ்ரநாமவ்யாக்யை

Supplemental No. 1164. Bundle No. 10. J. L. No. 11. Substance—Paper. Sheets—50. Script—Devanāgarī. No. of Granthas—1200. Incomplete. Author—Nil.

Beginning :

श्रीमन्महागणपतये नमः ॥ वेदसारसाहस्राख्यव्याख्या-प्रतिज्ञा उच्यते । अस्मिन्नामसहस्रे अतिशयबाहुळ्यस्य विद्यमानत्वात् । तथाहि—

End :

पद्मवराय ॥ पद्मशब्देन पद्मासनपद्मनाभावुच्येते । ता + ॥

Colophon : Nil.

Subject :

वेदसारशिवसहस्रनामव्याख्या असंपूर्णा ॥

Remarks:—

समीचीना स्थितिः ॥

॥ श्रीविद्यामालामन्त्रः ॥

ŚRĪVIDYĀMĀLĀMANTRAH

ஸ்ரீவித்யாமாலாமந்த்ரம்

Supplemental No. 1165. Bundle No. 10. J. L. No. 12. Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—28. Complete. Author—Nil.

Beginning :

अस्य श्रीमिथुनजगदम्बामालामन्त्रस्य पुरुषप्रकृत्यधिष्ठाई
रुद्र ... ... मादित्य ऋषिः ॥

End :

आईपल्लवितैः परस्परयुतैः द्वित्रिक्रमाद्यक्षरैः
काद्यैः क्षान्तगतैः स्वरादिभिरतः क्षोतेश्च तैस्स्वस्वरैः ।
नामानि त्रिपुरे भवन्ति खलु तान्यत्यन्तगुह्यानि ते
तेभ्यो भैरवपत्निविंशतिसहस्रेभ्यः परेभ्यो नमः ॥ २० ॥

Colophon :

इति श्रीविद्यामालापञ्चदशी सम्पूर्णमस्तु ॥

Subject :

पञ्चदशपञ्चदशीमालामन्त्राणां प्रयोगफलादिकथनम् ॥ माला-
मन्त्रास्तु नात्र विद्यन्ते ॥

Remarks:—

मातृकेयं कीटजग्धा अतिप्राचीना च । प्रथमपुटे मषीनाशात्
दुर्ज्ञेयान्यक्षराणि ॥

॥ शिवोत्कर्षमञ्जरी ॥

ŚIVOTKARṢAMAÑJARĪ

சிவோத்கர்ஷமஞ்சரீ

Supplemental No. 1166. Bundle No. 10. J. L. No. 13. Substance—Paper. Sheets—6. Script—Devanāgarī. No. of Granthas—130. Complete.

Author— अप्पय्यदीक्षितेन्द्राः ।

Beginning:

श्रीशिवाय नमः ॥

या लक्ष्मीस्त्रिजगच्छरण्यचरणा तस्याः पतिर्यच्छरः
यद्देयं निखिलैर्वदान्यनिवहैस्तद्यस्य जीर्णं धनुः ।
या संविच्छ्रुतिषु श्रुता रहसि सा यत्पादसंसेविनी
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥ १ ॥

End:

साराश्शब्दकुलस्य येन निगमा वाहा इति स्वीकृताः
सारावद्रिषु कार्मुकं गृहमिति द्वौ हैमरूप्यौ हृतौ ।
सारा वारिषु जाह्नवीति विधृता भक्तानुकम्पाच्छलात्
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥ ५१ ॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभ श्रीकण्ठमतप्रतिष्ठापनाचार्य चतुरधिकशतप्रबन्धनिर्वाहक श्रीमदप्पय्यदीक्षितकृतिषु शिवोत्कर्षमञ्जरी समाप्ता ॥ श्रीसाम्बशिवाय परब्रह्मणे विश्वाधिकाय नमः ॥

Subject:

शिवोत्कर्षमञ्जरी ॥

Remarks:—

समीचीना स्थितिः ॥

॥ शिवानन्दलहरी ॥

ŚIVĀNANDALAHARĪ

சிவாநந்தலஹரீ

Supplemental No. 1167. Bundle No. 10. J. L. No. 14. Substance—Paper. Sheets—11. Script—Devanāgarī. No. of Granthas—185. Incomplete.

Author— श्रीमद्भगवत्पादाः ।

Beginning:

श्रीगणेशाय नमः ॥

कलाभ्यां चूडालङ्कृतशशिकलाभ्यां निजतपः-
फलाभ्यां भक्तेषु प्रकटितफलाभ्यां भवतु मे ।
शिवाभ्यामस्तोकत्रिभुवनशिवाभ्यां हृदि पुनः
भवाभ्यामानन्दस्फुरदनुभवाभ्यां नति(रियम्) ॥

End:

क्रीडार्थं सृजसी प्रपञ्चमखिलं क्रीडामृगास्ते ज...
यत्कर्माचरितं मयापि भवतः प्रीत्यै भवत्येव तत् ।
शम्भो स्वस्य कुतूहलस्य करणं मच्चेष्टितं निश्चितं
नित्यं मामकरक्षणं पशुपते कर्तव्यमेतत्त्वया ॥ ६६ ॥

Colophon : Nil

Subject :

शिवानन्दलहरीभागः ।

Remarks :—

प्राचीनेयं मातृका । प्रथमपत्रे प्रायेण भागार्धं विशीर्णं नष्टं च ॥

॥ शिवोत्कर्षश्लोकाः ॥

ŚIVOTKARṢAŚLOKĀḤ

சிவோத்கர்ஷச்லோகங்கள்

Supplemental No. 1168. Bundle No. 10. J. L. No. 15

Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—20. Incomplete. Author—?

Beginning:

श्रीशिवाय नमः ॥

यो रम्भापरिरम्भणेपि शुनकीतुङ्गाङ्गसङ्गेपि वा
तुल्यत्वं मनुते शिवार्चनपरः स स्वर्गवाञ्छां कथम् ।
कर्तुं वा यतते विरक्तमनसां तत्राप्यपेक्षा कथं
मोक्षेच्छा परमस्ति तस्य सततं लिंगार्चकस्य ध्रुवम् ॥ १ ॥

End:

विद्यातीर्थे जगति विबुधाः साधवस्सत्यतीर्थे
लज्जातीर्थे कुलयुवतयः दानतीर्थे धनाढ्याः ।
गङ्गातीर्थे मलिनमतयः योगिनो ध्यानतीर्थे
धारातीर्थे धरणिपतयः पातकं क्षालयन्ति ॥ १ ॥

Colophon: Nil.

Subject :

शिवशैवोत्कर्षप्रतिपादकं श्लोकदशकम् ॥ अन्ते नीतिश्लोकमेकं च ॥

Remarks:—

सभीचीना स्थितिः ॥

॥ शिवकवचभागः ॥

ŚIVAKAVACABHĀGAḤ

சிவகவசபாகம்

Supplemental No. 1169. Bundle No. 10. J. L. No. 16. Substance—Paper. Sheets—1, 3—5 = 4. Script—Devanāgarī. No. of Granthas—50. Incomplete. Author—Nil.

Beginning:

श्रीगणेशाय नमः ॥ अस्य श्रीशिवकवचस्तोत्रमहामन्त्रस्य
वृषभयोग ऋषिः ॥

End :

इति भद्राइषुं सम्यक् अनुशासः समात्रकम् ।
ताभ्यां संपूजित सोयः योगीश्वरगतिर्ययौ ॥

Colophon :

इति श्रीब्रह्मोत्तरखण्डे शिवकवचरहस्यं नाम द्वादशोध्यायः ॥
श्रीसाम्बशिवार्पणमस्तु ॥

Subject :

द्वितीयपत्रहीनतया कवचमिदमसमाप्तम ॥

Remarks:—

नातिसमीचीना मातृका ॥

॥ शिववेदपादस्तवैकदेशः ॥

ŚIVAVEDAPĀDASTAVAIKADEŚAḤ

சிவவேதபாதஸ்தவைகதேசம்

Supplemental No. 1170. Bundle No. 10. J. L. No 17. Substance—Paper. Sheets—2. Script—Davanāgarī. No. of Granthas—10. Incomplete.

Remarks :—

समीचीना स्थितिः ॥ अनुपयुक्तेयं मातृकेत्यतः आद्यन्तादिकं न लिखितम् ॥

॥ रामस्तोत्रम् ॥

RĀMASTOTRAM

ராமஸ்தோத்ரம்

Supplemental No. 1171. Bundle No. 10. J. L. No. 18. Substance—Paper. Sheets—4. Script—Devanāgari. No. of Granthas—35. Incomplete. Author—

Beginning:

श्रीरामचन्द्राय नमः ॥

संपूर्णचन्द्रवदनं सरसीरुहाक्षं
माणिक्यकुण्डलधरं मकुटाभिरामं ।
चाम्पेयगौरवसनं शरचापहस्तं
श्रीवीररामममिनिशं शिरसा नमामि ॥ १ ॥

End:

सकलभुवनरत्नं सर्वशास्त्रार्थरत्नं
समयविजयरत्नं सच्चिदानन्दरत्नम् ।
दशरथकुलरत्नं सीतया सेव्यरत्नं
दशमुखरिपुरत्नं पातु मां रामरत्नम् ॥ १७ ॥

Colophon : Nil.

Subject :

रामस्तोत्रम् ॥

Remarks :—

समीचीना स्थितिः ॥

॥ श्यामलादण्डकम् ॥

ŚYĀMALĀDAṆḌAKAM

ச்யாமளாதண்டகம்

Supplemental No. 1172. Bundle No. 10. J. L. No. 19. Substance—Paper. Sheets—10. Script—Devanāgarī. No. of Granthas—40. Incomplete.

Author— कालिदासः ।

Beginning:

... ... मञ्जुसंभाषणे ॥

चारुशिञ्जत्कटिक्षुत्र निर्भर्हसता + ॥

End:

सर्वसर्वात्मिके सर्वगे पाहि मां देवि तुभ्यं नमो ॥ ३३३ ॥

Colophon: Nil.

Subject:

श्यामलादण्डकभागः ॥

Remarks:—

समीचीना स्थितिः ॥ नूत्नेयं मातृका ॥

॥ शिवस्तोत्रम् ॥

SÍVASTOTRAM

சிவஸ்தோத்ரம்

Supplemental No 1173. Bundle No. 10. J L. No. 20. Substance—Paper. Sheets—4. Script—Devanāgarī. No. of Granthas—35. Incomplete.
Author— शिवरहस्ये ।

Beginning :

श्रीगणेशाय नमः ॥ शिवरहस्ये तृतीयांशे पूर्वभागे एकोन-
पञ्चाशोध्याये--
श्रीविश्वनाथ शरणागतवत्सलेश
त्वत्पादपद्मभजनाय मनः प्रवृत्तम् ।
पुण्यैरगण्यविभवैस्तदपारपुण्य-
निक्षेपलाभमनुवांच्छति तत्प्रयच्छ ॥ १ ॥

End:

कृत्यं किमस्ति मरणोत्तरमौषधानां
संजीवनी + ॥

Colophon: Nil.

Subject :

शिवस्तोत्रे 1—20 श्लोकास्संपूर्णाः ॥

Remarks :—

समीचीना स्थितिः ॥

॥ ललितात्रिशतीस्तोत्रम् ॥

LALITĀTRIŚATĪSTOTRAM

லலிதாத்ரிசதீஸ்தோத்ரம்

Supplemental No. 1174. Bundle No. 10. J. L. No. 21.
Substance—Paper. Sheets—5—8 = 4+10—12 = 3 = 7.
Script—Devanāgarī. No. of Granthas—70. Incomplete.
Author—Nil.

Beginning :

... ... शासनात् ॥

श्रीमत्पञ्चदशाक्षर्याः कादिवर्णक्रमान्मुने ॥ २४ ॥

End :

सकाराख्या समरसा सकलागमसंस्तुता ।

सर्ववेदान्त + + + + + + + ॥ ४३ ॥

Colophon : Nil.

Subject :

आदिमध्यान्तहीनं ललितात्रिशतीस्तोत्रम् ॥

Remarks :—

समीचीना स्थितिः ॥

॥ पूर्णमन्त्ररामायणम् ॥

PŪRṆAMANTRARĀMĀYAṆAM

பூர்ணமந்த்ராராமாயணம்

Supplemental No. 1175. Bundle No. 10. J. L. No, 22.
Substance — Paper. Sheets — 3. Script — Devanāgarī.
No. of Granthas—35. Incomplete.
Author— मयूरपन्त

Beginning :

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

शुभमस्तु ॥ अविघ्नमस्तु ॥

श्रीमन् राजाशिरोमणि दशरथजो निजयशेंबरामाहित ।

End :

श्रीराज्य नमन मात्रें अनुजसमयथार्थमान राशिमहा ।
रजनि + ॥

Colophon : Nil.

Subject :

महाराष्ट्रभाषामयस्तोत्रम् ॥

Remarks :—

समीचीना स्थितिः

॥ परस्परासङ्गतपत्रचयः ॥

PARASPARĀSAṄGATAPATRACAYAH

ஒன்றுக்கொன்று ஸம்பந்தமில்லாத ஓலைகள்

Supplemental No. 1176. Bundle No. 10. J. L. No. 23.
Substance—Paper. Sheets — 52. Script — Devanāgarī.

Remarks :—

गुच्छेऽस्मिन् विद्यमानेषु पत्रेषु नैकोपि विषयः संपूर्णः नाप्युपादेयश्चेत्यतः प्रतिपत्रं विद्यमानो विषयः नोदाहृतः ॥

॥ दत्ताह्निकम् ॥

DATTĀNHIKAM

தத்தாந்ஹிகம்

Supplemental No. 1177. Bundle No. 13. J. L old No. 16/474.
Substance—Paper. Sheets—5—23=24. Script—Devanāgarī. No. of Granthas—350. Incomplete. Author—?

Beginning:

सं हं मनोबुद्धिचित्त अहंकारात्मने विज्ञानात्मने करत० इति षड्भिष्षडङ्गन्यासः ॥

End:

ब्रह्मणे इदं न मम । ततः पूर्तौ श्रीदत्तात्रेयाया स्वहा ।

श्रीदत्तात्रेय(याय) इदं न मम ॥

Colophon:

इति आह्निकं समाप्तम् ॥ इति श्री आत्मारामगुरुनाथाय प्रणमस्तु ॥

श्रीदत्तात्रेयपरमगुरुभ्यो नमः ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥ श्रीकृष्णार्पणमस्तु ॥

Subject:

स्नानविधिः । सन्ध्याविधिः । जपविधिः । मानसिकपूजाविधिः । बाह्यपूजाविधिः । होमविधिश्च ॥

Remarks:—

मातृकेयं प्राचीना समीचीना च । आदौ 1—4 पत्राणि नष्टानि ।

॥ पल्लीसरटपतनशान्तिः ॥

PALLĪSARAṬAPATANAŚĀNTIḤ

பல்லீசரடபதநசாந்தி

Supplemental No. 1178. Bundle No. 13. J. L. old No. 12/475. Substance—Paper. Sheet—1. Script—Devanāgarī. No. of Granthas—20. Complete.

Author— गर्गप्रोक्तः ।

Beginning:

श्रीगणेशाय नमः ॥ अथ पल्लीसरटशान्तिः ॥

गर्गः—

पल्ल्याः प्रपातस्य फलं सरटस्य तथैव च ।
शीर्षे राज्यं श्रियः प्राप्तिः फाले चैश्वर्यवर्धनम् ॥

End:

इत्थं मन्त्रविधानेन यः कुर्याच्छान्तिमुत्तमम् ।
तस्यायुर्विजयो लक्ष्मीः कीर्तिः पुष्टिश्च जायते ॥

Colophon: Nil.

Subject:

शरीरावयवेषु पल्लीसरटपतनेन जातस्य दोषस्य शान्तिविधानम् ।

Remarks:—

समीचीना स्थितिः ॥

॥ दायविभागः ॥

DĀYAVIBHĀGAH

தாயவிபாகம்

Supplemental No. 1179. Bundle No. 13. J. L. old No. 13/476. Substance—Paper. Sheets—1—7+3—10=15. Script—Devanāgarī. No. of Granthas—300. Incomplete.

Beginning :

पाकरणे पुत्रपौत्रैः ऋणं देयमित्यधिकारश्रवणात् ।

End :

इयं मर्यादा मदीयभुव इत्युक्ते नेत्येवंविधः सीमा + ॥

Colophon : Nil.

Subject:

आदौ पत्रसप्तकं अनङ्कं । तत्र असङ्कतविषयकः आद्यन्तहीनः दायविभागः । ततः 3—10 पत्रेषु साङ्केषु क्षेत्रव्यवहारादि-विषयः । अयमपि विषयः आद्यन्तविहीन एव ॥

Remarks :—

मातृकायाः स्थितिस्समीचीना । पञ्चभैः विलिखितानां पत्राणां सञ्चयात्मिकेयं मातृका ॥

॥ दत्तात्रेयसहस्रनामावलिः ॥

DATTĀTREYASAHASRANĀMĀVALIH

தத்தாத்ரேயஸஹஸ்ரநாமாவளி

Supplemental No. 1180. Bundle No. 13. J. L. old No. 22/485. Substance — Paper. Sheets—22. Script — Devanāgarī.

No. of Granthas—170. Incomplete.

Author— दासप्रोक्तम् ।

Beginning:

श्रीदत्तात्रेयाय नमः ॥

यतः प्रवृत्तिर्वेदानां भूतानां भवनात्मनाम् ।

ज्ञानं विज्ञानप्राप्तिश्च तस्मै श्रीगुरवे नमः ॥

End:

ओं साधनेश्वराय नमः ५२९ ॥ ओं साधवे नमः ५३० ॥

ओं साधुवरिष्ठात्म + + ॥

Colophon : Nil.

Subject:

पूर्वपीठिकाऋष्याद्युपेता दत्तात्रेयसहस्रनामावलिः ॥

Remarks:—

मातृकायाः स्थितिः समीचीना । आदितः 530 नामान्येव सम्पूर्णानि भवन्ति ॥

॥ ललितात्रिशतीस्तोत्रम् ॥

LALITĀTRIŚATĪSTOTRAM

லலிதாத்ரிசதீஸ்தோத்ரம்

Supplemental No. 1181. Bundle No. 13. J.L old No. 80/493. Substance—Paper. Sheets—9. Script—Devanāgarī. No. of Granthas—100. Complete.

Author— ब्रह्माण्डे हयग्रीवोपदिष्टम् ।

Beginning :

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

श्रीदेव्यै नमः ॥ अगस्त्य उवाच—

हयग्रीव दयासिन्धो भगवन् भक्तवत्सल ।

त्वत्तः श्रुतमशेषेण श्रोतव्यं यद्यदस्ति तत् ॥

End:

